श्रीगणेशायनमः ॥ ॥ श्रीगुरुभ्योनमः ॥ ॥ सूतउवाच ॥ ॥ शौनकाद्यैर्महाभागै
र्देवर्षिःसहनारदः ॥ सनत्कुमारंपप्रच्छप्रणम्यविधिपूर्वकम् ॥ १ ॥ नारदउवाच ॥
सनत्कुमारमेब्रूहितीर्थंतीर्थोत्तमोत्तमम् ॥ तारकंसर्वभूतानांपठतांशृण्वतांतथा ॥ २ ॥
॥ सनत्कुमारउवाच ॥ ॥ वक्ष्येतीर्थंपरंपुण्यंश्राद्धादौसर्वतारकम् ॥ गयातीर्थंसर्व
देशेतीर्थेभ्योप्यधिकंशृणु ॥ ३ ॥ गयासुरस्तपस्तेपेब्रह्मणाक्रतवेर्थितः ॥ प्राप्तस्यत
स्यशिरसिशिलांधर्मोह्यधारयत् ॥ ४ ॥ तत्रब्रह्माकरोद्यागंस्थितश्चादिगदाधरः
फल्गुतीर्थादिरूपेणानिश्चलार्थमहर्निशम् ॥ ५ ॥ गयासुरस्यविप्रेंद्रब्रह्माद्यैर्देवतैः
सह ॥ कृतयज्ञोददौब्रह्माब्राह्मणेभ्योगृहादिकम् ॥ ६ ॥ श्वेतकल्पेतुवाराहेगयोयाग
मकारयत् ॥ गयनाम्नागयाख्यातंक्षेत्रंब्रह्मर्षिकांक्षितम् ॥ ७ ॥ कांक्षंतिपितरःपुत्रा
न्नरकाद्भयभीरवः ॥ गयांयास्यतियः पुत्रःसनस्त्राताभविष्यति ॥ ८ ॥ गयांप्राप्तं
सुतंदृष्ट्वापितॄणामुत्सवोभवेत् ॥ पद्भ्यामपिजलंस्पृष्ट्वासोस्मभ्यंकिन्नदास्यति ॥ ९ ॥
एष्टव्याबहवः पुत्रायद्येकोपिगयांव्रजेत् ॥ यजेद्वाचाश्वमेधेननीलंवावृषमुत्सृजेत् ॥
॥ १० ॥ गयांगत्वान्नदातायः पितरस्तेनपुत्रिणः ॥ पक्षत्रयनिवासीचपुनात्यासप्तमं
कुलम् ॥ ११ ॥ नोचेत्पंचदशाहंवासप्तरात्रंत्रिरात्रकम् ॥ महाकल्पकृतंपापंगयांप्रा
प्यविनश्यति ॥ [illegible] ॥ पिंडंदद्याच्चपित्रादेरात्मनोपितिलैर्विना ॥ ब्रह्महत्यासुरापानं

स्तेयंगुर्वंगना[illegible] १३ ॥ पापंतत्संगजंसर्वंगयाश्राद्धाद्विनश्यति ॥ आत्मजोप्य
न्यजोवापिगयाभूमौयदातदा ॥ १४ ॥ यन्नाम्नापातयेत्पिंडंतंनयेद्ब्रह्मशाश्वतम् ॥
ब्रह्मज्ञानंगयाश्राद्धंगोग्रहेमरणंतथा ॥ १५ ॥ वासःपुंसांकुरुक्षेत्रेमुक्तिरेषाचतुर्विधा॥
ब्रह्मज्ञानेनाकिंसाध्यंगोग्रहेमरणेनाकिम् ॥ १६ ॥ वासेनकिंकुरुक्षेत्रेयदिपुत्रोगयांव्र
जेत् ॥ गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः ॥ १७ ॥ अधिमासेजन्मदिनेचास्तेपि
गुरुशुक्रयोः ॥ नत्यक्तव्यंगयाश्राद्धंसिंहस्थेऽपिबृहस्पतौ ॥ १८ ॥ सकृद्गयाभिग
मनंसकृत्पिंडप्रपातनम् ॥ दुर्लभंकिंपुनर्मन्येअस्मिन्नेवव्यवस्थितः ॥ १९ ॥ प्रमा
दान्म्रियतेक्षेत्रेब्रह्मादे[1]र्मुक्तिदायके ॥ ब्रह्मज्ञानाद्यथामुक्तिर्लभे[2]तेनात्रसंशयः ॥ २० ॥
की[3]कटादिमृतानांचपितॄणांतारणायच ॥ तस्मात्सर्वप्रयत्नेनवस्तव्यंसुविचक्षणैः ॥
॥ २१ ॥ ब्रह्मप्रकल्पितान्वि[4]प्रान्हव्यकव्यादिनार्चयेत् ॥ तैस्तुष्टैस्तोषिताः सर्वाःपि
तृभिःसहदेवताः ॥ २२ ॥ मुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः ॥ वर्जयित्वाकुरुक्षे
त्रंविशालंविरजांगयाम् ॥ २३ ॥ दंडंप्रदर्शयोद्भिक्षुर्गयांगत्वानपिंडदः ॥ दंडंस्पृष्ट्वावि
ष्णुपदेपितृभिःसहमुच्यते ॥ २४ ॥ नदंडीकिल्बिषंधत्तेपुण्यंवापरमार्थदम् ॥ अतः
सर्वक्रियांत्यक्त्वाविष्णुंध्यायेत्तुभावुकम् ॥ २५ ॥ संन्यसेत्सर्वकर्माणिवेदमेकंनसंत्य

१ ब्रह्मादिसकलदेवानाम् । २ तथेत्यध्याहार्यम् । ३ कीकटादिवासनिषिद्धदेशविशेषे मृतानाम् । ४ गयाक्षेत्रवा-

नेत् ॥ मुंडपृष्ठाञ्चपूर्वस्मिन्पश्चिमेदक्षिणोत्तरे ॥ २६ ॥ सार्धक्रोशद्वयंमानंगयेतिब्र
ह्मणेरितम् ॥ पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः ॥ २७ ॥ तन्मध्येसर्वतीर्थानि
त्रैलोक्येयानिसंतिवै ॥ श्राद्धकृद्योगयाक्षेत्रेपितृणामनृणोहिसः ॥ २८ ॥ शिरसिश्रा
द्धकृद्यस्तुकुलनाशात्तमुद्धरेत् ॥ गृहाञ्चलितमात्रेणगंयायांगमनंप्रति ॥ २९ ॥ स्व-
र्गारोहणसोपानंपितॄणांचपदेपदे ॥ पदेपदेऽश्वमेधस्ययत्फलंगच्छतोगयाम् ॥ ३० ॥
तत्फलंचभवेन्नृणांसमग्रंनात्रसंशयः ॥ पायसेनाथचरुणासक्तुनापिष्टकेनवा ॥ ३१ ॥
तंडुलैःफलमूलाद्यैर्गयायांपिंडपातनम् ॥ तिलकल्केनखंडेनगुडेनसघृतेनवा ॥ ३२ ॥
केवलेनैवदध्नावाऊर्जेनमधुनापिवा ॥ पिण्याकखंडंसघृतंपितृभ्योक्षय्यमित्युत ॥
॥ ३३ ॥ इष्यतेपितृभिर्भोज्यंहविष्यान्नंमुनीरितम् ॥ मुष्टिमात्रप्रमाणेनचार्द्रामलक
मात्रकम् ॥ शमीपत्रप्रमाणेनापिंडंदद्याद्गयाशिरे ॥ ३४ ॥ उद्धरेत्सप्तगोत्राणिकुलमे
कोत्तरंशतम् ॥ पितामाताचभार्याचभगिनीदुहितुःपतिः ॥ ३५ ॥ पितृष्वसामा
तृष्वसासप्तगोत्राणितारयेत् ॥ चतुर्विंशश्चविंशश्चषोडशद्वादशैवहि ॥ ३६ ॥
रुद्रादशवसुश्चैवकुलमेकोत्तरंशतम् ॥ एकतः सर्ववस्तूनिरसवंतिमधूनिहि ॥ ३७ ॥
स्मृत्वागदाधरांघ्र्यब्जंफल्गुतीर्थांबुचैकतः ॥ नावाहनंनदिग्बंधोनदोषोदृष्टिसंभवः ॥

सिनोब्राह्मणान । ५ एतन्नापकः स्थानविशेषस्तस्मात् । ६ एकैकासिक्थमात्रेण

॥ ३८ ॥ संकारुण्यनकर्तव्यंतीर्थश्राद्धंविचक्षणैः ॥ पिंडासनंपिंडदानंपुनः प्रत्यवने
जनम् ॥ ३९ ॥ दक्षिणाचान्नसंकल्पस्तीर्थश्राद्धेष्वयंविधिः॥ अन्यत्रावाहिताःकाले
पितरोयांत्यमुंप्रति ॥ ४० ॥ अत्रागतंसुतंदृष्ट्वास्वयमायांतिसर्वथा ॥ तीर्थश्राद्धंप्रय
च्छद्भिःपुरुषैःफलकांक्षिभिः ॥ ४१ ॥ कामंक्रोधंतथालोभंत्यक्त्वाकार्याऽदिकाः क्रि
याः ॥ ब्रह्मचार्यैकभोजीचभूशायीसत्यवाक्छुचिः ॥ ४२ ॥ सर्वभूतहितेरक्तःसतीर्थ-
फलमश्नुते ॥ तीर्थान्यनुसरन्धीरःपाखंडंपूर्वतस्त्यजेत् ॥ ४३ ॥ पाखंडंतच्चविज्ञेयं
यद्भवेत्कर्मकामतः ॥ तीर्थेषुयेनराधीराःकर्मकुर्वंतितद्व्रताः ॥ ४४ ॥ यथाब्रह्मविदोवे
द्यंवस्तुवानन्यचेतसः ॥ प्रविशंतिपरेसांख्यंब्रह्मब्रह्मपरायणाः ॥ ४५ ॥ गयायांनहि
तत्स्थानंयत्रतीर्थंनाविद्यते ॥ सान्निध्यंसर्वतीर्थानांगयातीर्थंततोवरम् ॥ ४६ ॥ मीने
मेषेस्थितेसूर्येकन्यायांकार्मुकेघटे ॥ दुर्लभंत्रिषुलोकेषुगयायांपिंडपातनम् ॥ ४७ ॥
मकरेवर्तमानेचग्रहणेचंद्रसूर्ययोः ॥ दुर्लभंत्रिषुलोकेषुगयायांपिंडपातनम् ॥ ४८ ॥
गयायांपिंडदानेनयत्फलंलभतेनरः ॥ नतच्छक्यंमयावक्तुंकल्पकोटिशतैरपि ॥४९॥

१ दयायुक्तांतःकरणेनेत्यर्थः । २ पादप्रक्षालम् । ३ गयायां श्राद्धकर्तारम् । ४ कर्तव्यसांसारिकान्यक्रियास्त्य क्त्वानिश्चिन्त एकाग्रमानसो भूत्वेत्यर्थः । तीर्थयात्रां कुर्वन् । ६ अनेन समग्रं गयाक्षेत्रंतीर्थमयत्वात्परिपूज्यतममिति ध्वनितम् । २ धनुषि । ३ कुंभे, घटे इति पाठेतुलायाम् ।

इतिश्रीवायुपुराणेश्वेतवाराहकल्पेगयामाहात्म्येप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥
॥ नारदउवाच ॥ ॥ गयासुरःकथंजातःप्रभावःकिं किमात्मकः ॥ तपस्तप्तंकथंतेनक
थंदेहपवित्रता ॥ १ ॥ सनत्कुमारउवाच ॥ विष्णोर्नाभ्यंबुजाज्जातोब्रह्मालोकपि
तामहः ॥ प्रजाःसृजेतिसंप्रोक्तःपूर्वंदेवेनविष्णुना ॥ २ ॥ आसुरेणैवभावेनह्यसुरानसृ
जत्पुरा ॥ सौमनस्येनभावेनदेवान्सुमनसोसृजत् ॥ ३ ॥ गयासुरःसुराणांचमहाब
लपराक्रमः ॥ योजनानांसपादंचशतंतस्योच्चयःस्मृतः ॥ ४ ॥ स्थूलःषष्टियोजना
नांश्रेष्ठोसौवैष्णवैःस्मृतः ॥ कोलाहलेगिरिवरेतपस्तेपेसुदारुणम् ॥ ५ ॥ बहुवर्ष
सहस्राणिनिरुच्छ्वासःस्थिरोभवत् ॥ तत्तपस्तापितादेवाःसंक्षोभंपरमंगताः ॥ ६ ॥
ब्रह्मलोकंगतादेवाःप्रोचुस्तेथापितामहम् ॥ गयासुराद्रक्षदेवब्रह्मादेवांस्तथाब्रवीत् ॥
॥ ७ ॥ व्रजामःशंकरंदेवान्ब्रह्माद्याश्चगताःशिवं ॥ कैलासेचाब्रुवन्नत्वारक्षरक्षमहासु
रात् ॥ ८ ॥ ब्रह्माद्यांश्चाब्रवीच्छंभुर्व्रजामःशरणंहरिम् ॥ क्षीराब्धौदेवदेवेशःसनःश्रे
योभिधास्यति ॥ ९ ॥ ब्रह्मामहेश्वरोदेवाविष्णुंनत्वाप्रतुष्टुवुः ॥ देवाऊचुः ॥ ओंन
मोविष्णवेभूभर्त्रेसर्वेषांप्रभविष्णवे ॥ १० ॥ रोचिष्णवेजिष्णवेचराक्षसादिग्रासिष्ण
वे ॥ धरिष्णवेखिलस्यास्ययोगिनांपारदृष्णवे ॥ ११ ॥ बर्हिष्णवेह्यनंतायनमोभ्रा

४ आदिदेवेन न[illegible]देवशब्दस्य सुराद्विडर्थोत्र । ९ शरीरस्योच्चता । गयासुरः ।

जिष्णवेनमः ॥ ॥ सनत्कुमारउवाच ॥ ॥ एवंस्तुतोवासुदेवःसुराणांदर्शनं ददौ ॥
॥ १२ ॥ किमर्थमागतादेवाविष्णुनोक्तास्तमब्रुवन् ॥ गयासुरभयाद्देवरक्षास्मानब्र
वीद्धरिः ॥ १३ ॥ ब्रह्माद्यायांतुतंदैत्यंचागमिष्याम्यहंततः ॥ केशवोगरुडारूढोव
रंदातुंगयासुरम् ॥ १४ ॥ सर्वैस्स्वंस्वंसमास्थायनिजवाहनमुत्तमम् ॥ ऊचुस्तंवासुदे
वाद्याःकिमर्थंतप्यतेत्वया ॥ १५ ॥ संतुष्टाश्चागताःसर्वेवरंब्रूहिगयासुर ॥ ॥ गया
सुरउवाच ॥ ॥ यदितुष्टाश्चमेदेवाब्रह्मविष्णुमहेश्वराः ॥ १६ ॥ सर्वदेवद्विजातिभ्यो
यज्ञतीर्थशिलोच्चयात् ॥ देवेभ्योतिपवित्रोहमृषिभ्योपिशि[२]वाव्ययात् ॥ १७ ॥ ज्ञा
निभ्यश्चापिकर्मिभ्योधर्मिभ्यश्चतथापुनः ॥ मंत्रिभ्योतिपवित्रोहंपवित्रोभवभोःसदा
॥ १८ ॥ पवित्रमस्तु[३]तंदेवादैत्यमुक्त्वाययुर्दिवम् ॥ दृष्ट्वादैत्यंततःस्पृष्ट्वासर्वेहरिपुरं
ययुः ॥ १९ ॥ शून्येलोकत्रयेजातेशून्यायमपुरीह्यभूत् ॥ यमइंद्रादिभिःसार्धंब्रह्मलो
कंततोऽगमत् ॥ २० ॥ ब्रह्माणमूचिरेदेवागयासुरविलेपिताः ॥ त्वयादत्तोधिका
रोवैत्वंगृहाणपितामह ॥ २१ ॥ ब्रह्माब्रवीत्ततोदेवान्व्रजामोविष्णुमव्ययम् ॥ ब्र
ह्मादयोऽब्रुवन्विष्णुंत्वयादत्तवरोऽसुरः ॥ २२ ॥ तद्दर्शनाद्ययुःस्वर्गेशून्यंलोकत्रयं
ह्यभूत् ॥ देवैस्तुष्टोवासुदेवोब्रह्माणंसवचोऽब्रवीत् ॥ २३ ॥ गत्वासुरंप्रार्थयस्वयज्ञा

१ तत इति शेषः । २ अव्ययान्नाशरहिताच्छिवादित्यर्थः । ३ इतीत्यध्याहार्यम् ।

र्थंदेहिदेहकम् ॥ विष्णूक्तःससुरोब्रह्मागत्वापश्यन्महासुरम् ॥ २४ ॥ गयासुरोऽब्र
वीद्दृष्ट्वाब्रह्माणांत्रिदशैःसह ॥ संपूज्योत्थायविधिवत्प्रणतः प्रश्रयान्वितः ॥ २५ ॥
गयासुरउवाच ॥ अद्यमेसफलंजन्मअद्यमेसफलंतपः ॥ यदागतोतिथिर्ब्रह्मासर्वं
प्राप्तंममाद्यवै ॥२६॥ योगिन्योगांगवित्सर्वलोकस्वांमिन्पितर्गुरो ॥ यदर्थमागतो
ब्रह्मंस्तत्कार्यंकरवाण्यहम् ॥ २७ ॥ ब्रह्मोवाच ॥ पृथिव्यांयानितीर्थानि दृष्टानि
भ्रमतामया ॥ यज्ञार्थंनतुतेतानिपवित्राणिशरीरतः ॥ २८ त्वयादेहपवित्रत्वंप्राप्तं
विष्णुप्रसादतः ॥ अतःपवित्रंदेहंस्वंयज्ञार्थंदेहिमेसुर ॥ २९ ॥ गयासुरउवाच ॥
॥ धन्योहंदेवदेवेशयद्देहःप्रार्थ्यतेत्वया ॥ पितृवंशेकृतार्थोहंमातृवंशेतथैवच ॥३०॥
त्वयैवोत्पादितोदेहःपवित्रस्तुत्वयाकृतः ॥ सर्वेषामुपकाराययागोऽवश्यंभविष्यति ॥
॥ ३१ ॥ इत्युक्त्वासोपतद्भूमौश्वेतकल्पेगयासुरः ॥ नैर्ऋतींदिशमाश्रित्यतदाकोला
हलेगिरौ ॥ ३२ ॥ शिरःकृत्वोत्तरेदैत्यःपादौकृत्वातुदक्षिणे ॥ ब्रह्मासंभृतसंभारान्
मानसानृत्विजोसृजत् ॥ ३३ ॥ अग्निशर्माणममृतंशौनकंप्रांजलिंमृदुम् ॥ कुम
थिंवेदकौंडिन्यंहारीतंकाश्यपंकृपम् ॥ ३४ ॥ गार्ग्यंकौशिकवासिष्ठंमुनिंभार्गवमव्य
यम् ॥ वृद्धंपाराशरंकाण्वंमांडव्यंश्रुतिकेवलम् ॥ ३५ ॥ श्वेतंसुतालंदमनंकुहोत्रं

१ देवैः सहितः ।

कर्कमेवच ॥ लौगाक्षिंचमहाबाहुंजैगीषव्यंतथैवच ॥ ३६ ॥ दधिपंचभुवंविप्रऋष
भंकर्कमेवच ॥ कात्यायनंगोभिलंचमुनिमिश्रंमहाव्रतम् ॥ ३७ ॥ सुपालकंगौतमं
चतथावेदशिरोव्रतम् ॥ जटामालिनमव्यग्रंचाट्टहासंचदारुणम् ॥ ३८ ॥ आत्रेयं
चाप्यांगिरसमौपमन्युंमहाव्रतम् गोकर्णंचगुहावासंशिखंडिनमुमाव्रतम् ॥ ३९ ॥
एतानन्यांश्चविप्रेंद्रान्देवलोकपितामहः ॥ परिकल्प्याकरोद्यागंगयासुरशरीरके ॥
॥ ४० ॥ अग्निशर्मापिपंचाग्नीनूसुखादेतानथासृजत् ॥ दक्षिणाग्निंगार्हपत्यमाहव
नीयंतपोमयः ॥ ४१ ॥ सभ्यावसथ्यौदेवर्षेयेषुयज्ञाःप्रकीर्तिताः ॥ यज्ञस्यचप्रति
ष्ठार्थंविप्रेभ्योदक्षिणांददौ ॥ ४२ ॥ हुत्वापूर्णाहुतिंब्रह्मास्नात्वाचावभृथेऽसुरम् ॥
यज्ञवाटेसुरैःसार्द्धंसमानीयव्यरोपयत् ॥ ४३ ॥ ब्रह्मणःसरसिश्रेष्ठेतदादैत्योमहासु
रः ॥ चलितश्चकितोब्रह्माधर्मराजमभाषत ॥ ४४ ॥ जातागृहेतवशिलातामानी
यात्रधारय ॥ दैत्यस्यशीघ्रंशिरसितांधारयममाज्ञया ॥ ४५ ॥ निश्चलार्थंयमःश्रु-
त्वाधारयन्मस्तकेशिलाम् ॥ शिलायांधरितायांतुसशिलश्चासुरोऽचलत् ॥ ४६ ॥
देवाःपादैर्लक्षयित्वातथापिचालितोऽसुरः ॥ ब्रह्माथव्याकुलोविष्णुंगतःक्षीराब्धिशा
यिनम् ॥ ४६ ॥ तुष्टावप्रणतोभूत्वानत्वाचाहादृतः प्रभुम् ॥ ॥ ब्रह्मोवाच ॥

१ अयं कर्कर्षभोज्ञेयः । २ गयासुरम् । ३ यथार्थानुज्ञाम् ४ आक्रम्यापि भारंदत्वापीति यावत् ।

ब्रह्मांडस्यपतेनाथनमामिजगतांपतिम् ॥ ४८ ॥ प्रतिंकीर्तिमतांनृणांभुक्तिमुक्तिप्रदा
यकम् ॥ विष्वक्सेनोऽब्रवीद्विष्णुंदेवत्वांस्तौतिपद्मजः ॥ ४९ ॥ हरिराहानयस्वत्वं
विष्णूक्तःसतमानयत् ॥ अजमूचेहरिःकस्मादागतोऽसिवदस्वतत् ॥ ५० ॥
॥ ब्रह्मोवाच ॥ ॥ देवदेवकृतेयागेप्रचचालगयासुरः ॥ शिलायांदेवरूपिण्यांन्यस्ता
यांतस्यमस्तके ॥ ५१ ॥ रुद्रादिषुचदेवेषुसंस्थितेष्वसुरोऽचलत् ॥ इदानींनिश्च
लार्थंहिप्रसादंकुरुमाधव ॥ ५२ ब्रह्मणोवचनंश्रुत्वाह्याकृष्यस्वशरीरतः ॥ मूर्तिंददौनि
श्चलार्थंब्रह्मणेभगवान्हरिः ॥ ५३ ॥ आनीयमूर्तिंब्रह्मापिशिलायांसमधारयत् ॥ तथा
पिचलितंवीक्ष्यपुनर्देवमिहाह्वयत् ॥ ५४ ॥ आगत्यविष्णुःक्षीराब्धेःशिलायांसंस्थि
तोऽभवत् ॥ जनार्दनाभिधानेनपुंडरीकाक्षनामतः ॥५५॥ शिलायांनिश्चलार्थंहिस्वय
मादिगदाधरः॥ निश्चलार्थंपंचधासीच्छिलायांप्रपितामहः ॥५६॥ पितामहोऽथफल्गवी
शःकेदारःकनकेश्वरः ॥ ब्रह्मास्थितःस्वयंतत्रगजरूपीविनायकः ॥५७॥ गयादित्यश्चो
त्तरार्कोदक्षिणार्कस्त्रिधारविः॥ लक्ष्मीःसीताभिधानेनास्थितावैमंगलाह्वया ॥५८॥गाय
त्रीचैवसावित्रीत्रिसंध्येयंसरस्वती ॥ इन्द्रोबृहस्पतिः पूषावसवोष्टौमुनीश्वराः॥५९॥
विश्वेदेवाअश्विनौचमरुतोविश्वनायकः॥ सयक्षोरगगंधर्वास्तस्थुर्देवाःस्वशक्तितः ६०
आद्ययागदयाचासौयस्माद्दैत्यःस्थिरीकृतः॥ स्थितइत्येवहरिणातस्मादादिगदाधरः६१

ऊचेगयासुरोदेवान्किमर्थंवंचितोह्यहम् ॥ यज्ञार्थंब्रह्मणेदत्तंशरीरममलंमया ॥६२॥
विष्णोर्वचनमात्रेणाकिंनस्यान्निश्चलोह्यहम् ॥यत्सुरैःपीडितोत्यर्थंगदयाहरिणातथा६३
पीड्यश्चयद्यहंदेवाःप्रसन्नाःसंतुसर्वदा ॥ गदाधरायेतुष्टाःप्रोचुश्चापिगयासुरम्॥६४॥
वरंब्रूहिप्रसन्नाःस्मोदेवानूचेगयासुरः ॥ ॥गयासुरउवाच ॥ यावत्पृथ्वीपर्वताश्चयावच्चं
द्रार्कतारकाः ॥ ६५ ॥ तावच्छिलायांतिष्ठंतुब्रह्मविष्णुमहेश्वराः ॥ अन्येचसकलादेवा
मन्नाम्नाक्षेत्रमस्तुवै ॥६६॥ पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः ॥ तन्मध्येसर्वतीर्था
निंत्रैलोक्येयानितानिवै ॥६७॥ गंगाद्याःसुमहानद्यःसरांसिविविधानिच ॥ तेदेवास्ता
नितीर्थानिप्रयच्छंतुहितंनृणाम् ॥ ६८ ॥ स्नानादितर्पणंकृत्वापिंडदानात्फलादिकम् ॥
एकोविष्णुस्त्रिधामूर्तिर्यावत्संकीर्त्यतेबुधैः ॥६९॥ तावद्गयाशिरः क्षेत्रंख्यातिमेतुसदा
भुवि ॥ सहात्मानंसहस्रंचकुलानांचोद्धरेत्तुसः॥७०॥व्यक्ताव्यक्तस्वरूपेणयूयंतिष्ठंतुस
र्वदा ॥गदाधरःस्वयंलोकान्पूजनादघनाशनः ॥७१॥श्राद्धंसपिंडकंयेषांब्रह्मलोकंप्रया
तुते ॥ ब्रह्महत्यादिकंपापंविनश्यतिचसेविनाम् ॥ ७२ ॥ नैमिषंपुष्करंगंगांप्रयागंचविमु
क्तिदम् ॥ एतान्यन्यानितीर्थानिदिविभुव्यंतरिक्षतः ॥७३॥समायांतुसदानृणांप्रयच्छं
तुहितंनृणाम् ॥ किंबहूक्त्यासुरेशानायुष्मास्वेकापिदेवता ॥७४॥ चेन्नतिष्ठेदहंचापिस
मयःप्रतिपाल्यताम् ॥ गयासुरवचःश्रुत्वाप्रोचुर्विष्ण्वादयःसुराः ॥७५॥ त्वयायत्प्रार्थि

तंसर्वंतद्भविष्यत्यसंशयम्॥पितॄणांवैकुलशतमात्मांनंपिंडदानतः॥७६॥श्राद्धादिनान
यिष्यंतिब्रह्मलोकमनामयम् ॥ अस्मत्पदानर्चयित्वायास्यंतिपरमांगातिम् ॥७७॥ देवै
र्दत्तवरोदैत्योहर्षितोनिश्चलोऽभवत्॥स्थितेषुचैवदेवेषुब्राह्मणेभ्योददौह्यजः॥७८॥ग्रामां
स्तुपंचपंचाशत्पंचक्रोशंगयांतथा ॥ गृहान्कृत्वाददौदिव्यान्सर्वोपस्करसंयुतान् ७९
कामधेनुंकल्पवृक्षंपारिजातादिकांस्तरून् ॥ महानदींक्षीरवाहांघृतकुल्यांतथैवच८०
मधुस्रवांमधुकुल्यांदध्याज्यादिसरांसिच॥सुवर्णदीर्घिकांचैवबहूनन्नादिपर्वतान्॥८१॥
भक्ष्यभोज्यफलादींश्चसर्वंब्रह्मासृजन्ददौ ॥ नयाचध्वंचविप्रेंद्रा अन्यानुक्त्वाददौह्यजः
दत्वाययौब्रह्मलोकंनत्वाद्याादिगदाधरम् ॥धर्मारण्येतत्रधर्मैर्याजयित्वाययाजिरे॥८३॥
धर्मयागेचलोभाद्वैप्रतिगृह्यधनादिकम् ॥ तांबूलेपंचरत्नानिबलेनैवददौनृप ॥ ८४ ॥
धर्मयागस्यवैधूमेस्वर्गलोकंगतेसति ॥ ततोब्रह्मासमागत्यब्राह्मणांस्ताञ्छशापह ॥८५॥
कृतवंतोयतोलोभंमद्दत्तेष्वखिलेष्वपि॥ तस्मात्तृष्णाधिकायूयंभविष्यथसदाद्विजाः८६
युष्माकंवारिवाहास्यान्नदीपाषाणपर्वताः॥नद्यादयोवारिवाहास्मृदाद्याःप्रचुरागृहाः८७
कामधेनुःकल्पवृक्षःस्वर्लोकमुपतिष्ठतु ॥ एवंशप्ताब्रह्मणातेप्रार्थयंतोब्रुवन्नजम् ॥८८॥
त्वयायद्दत्तमखिलंतत्सर्वंशापतोगतम् ॥ जीवनार्थंप्रसादंनोभगवन्कर्तुमर्हसि॥८९॥

तच्छ्रुत्वाब्राह्मणान्ब्रह्माप्रोवाचेदंदयान्वितः॥तीर्थोपजीविकायूयमाचंद्रार्कंभविष्यथ९०

लोकाः पुण्यागयायांयेश्राद्धिनोब्रह्मलोकगाः ॥ युष्मान्येपूजयिष्यंतितैरहंपूजितः स
दा ॥ ९१ ॥ आक्रांतदैत्यजठरंधर्मेणविरजाद्रिणा ॥ नाभिकूपसमीपेचदेवीचविरजास्थि
ता ॥ ९२ ॥ तत्रपिंडादिकंकृत्वात्रिःसप्तकुलमुद्धरेत् ॥ माहेंद्रगिरिणातस्यकृतौपादौसु
निश्चलौ ॥९३ ॥ तत्रापिपिंडकृत्सप्तकुलान्युद्धरतेनरः ॥ ९४ ॥ इतिवायुपुराणेश्वेतवा
राहकल्पे गयामाहात्म्येद्वितीयोऽध्यायः ॥ २ ॥

॥ नारदउवाच ॥ कथंशिलासमुत्पन्नाययाक्रांतोगयासुरः ॥ किंरूपंकिंचमाहात्म्यं
तस्याःकिंवदनामच ॥१॥ ॥ सनत्कुमारउवाच ॥ ॥ श्रृणुनारदयत्पुण्यंकथयामिपुन
स्तव ॥ आसीद्धर्मोमहातेजाःसर्वविज्ञानपारगः ॥ २ ॥ विश्वरूपाचतत्पत्नीभर्तृ
व्रतपरायणा ॥ तस्यांधर्मात्समुत्पन्नाकन्याधर्मव्रतासती ॥ ३ ॥ सर्वलक्षणसंप
न्नालक्ष्मीरिवगुणाधिका ॥ तस्यांयेतुगुणाह्यासंस्तेनसंतिजगत्त्रये ॥ ४ ॥ धर्मोधर्मव्र
तायांतुत्रिषुलोकेषुमार्गयन् ॥ नानुरूपंवरंलेभेधर्मोक्तावरासिद्धये ॥५॥ तपःकुरुवरा
र्थत्वंतथेत्युक्त्वावनंययौ ॥ कन्यासाचतपस्तेपेसर्वेषांदुस्तरंचयत् ॥ ६ ॥ वायुभक्षः
श्वेतकल्पेयुगानामयुतंपुरा ॥ ब्रह्मणोमानसःपुत्रोमरीचिर्नामविश्रुतः ॥ ७ ॥ प्रवृत्ति
लक्षणंधर्मंकर्तुंसब्रह्मणेरितः ॥ पर्यटन्पृथिवींसर्वांकन्यारत्नंददर्शसः ॥ ८ ॥ रूपयौ

१ मैथुनेन प्रजासर्जनरूपम् ।

वनसंपन्नांपरमेतपसिसिस्थिताम् ॥ पप्रच्छाथमरीचिस्तांकात्वंकस्यासितद्वद ॥९॥ रू
पेणानेनमांनूनंविमोहयासिसुव्रते ॥ ब्रह्मात्मजोहंविख्यातोमरीचिर्वेदपारगः ॥ १० ॥
मरीचेर्वचनंश्रुत्वाकन्याप्रोवाचतंमुनिम् ॥ अहंधर्मव्रतानामधर्मपुत्रीतपोन्विता ॥११॥
पतिव्रतार्थंविप्रेंद्रचरामिपरमंतपः ॥ का[1]मावाप्तिर्भवेद्यावतावदेतत्[2]प्रवर्तनम् ॥ १२ ॥
धर्मव्रतांमरीचिस्तामुवाचप्रीतिपूर्वकम् ॥ पतिव्रतादर्शनान्मेभविष्यसिशुभव्रते १३॥
पतिव्रतेच्छयापृथ्वींविचरामिह्यहर्निशम् ॥ त्वंचेत्पतिव्रताजाताभजंतंभजमांवरम् १४
लोकेनत्वादृशीकन्याममतुल्योनतेवरः ॥ धर्मव्रतेधर्मपुत्रितस्मात्त्वंभजमे[3]धुना ॥१५॥
धर्मव्रतामुनिंप्राहधर्मं[4]याचयसुव्रत ॥ तच्छ्रुत्वाधर्ममगमन्मुनिंधर्मोददर्शह ॥ १६ ॥
तेजःपुंजवरंनत्वाआसनार्घ्यादिनार्चयत् ॥ किमर्थमागतःपृष्टोमरीचिर्धर्ममब्रवीत्
॥ १७ ॥ कन्यार्थंभ्रमतापृथ्वींदृष्टातेकन्यकावरा ॥ मह्यंकन्यांचतांदेहिश्रे
यस्तवभविष्यति ॥ १८ ॥ अर्घ्यादिनासमभ्यर्च्यधर्मःप्रोचेतथेतितम् ॥ धर्मव्रतां
समानीयदत्तवांस्तांमरीचये ॥१९॥ वरंचदत्तवांतस्मैतद्वाक्यंचयथाकृतम् ॥ अग्नि
होत्रेणसहितंस्वाश्रमंतांद्विजोनयत् ॥ २० ॥ रेमेमुनिस्तयासार्द्धंयथाविष्णुःश्रियास
ह ॥ पार्वत्याचयथाशंभुः सावित्र्याचयथाह्यजः ॥ २१ ॥ जज्ञेपुत्रशतंतस्यांमरीचिर्वि

१ मतःसंकल्पितवरप्राप्तिः । २ तपश्चरणप्रवृत्तिः । ३ मां कर्माणि षष्ठी । ४ त्वं यत इच्छसि ततः अहं ते दास्यामि ।

ष्णुगोपमम् ॥ मरीचिःफलपुष्पार्थंवनंगत्वासमागतः ॥२२॥ शांतःकदाचित्तांपत्नीमु
वाचेतिपतिव्रताम् ॥ भुक्त्वातुशयनस्थस्यपादसंवाहनंकुरु ॥ २३ ॥ धर्मव्रतातथेत्यु
क्त्वाशयानस्यचसामुने ॥ पादसंवाहनंचक्रेघृतेनाभ्यज्यतत्परा ॥२४॥ निद्रायमानेथ
मुनौब्रह्मातंदेशमागतः ॥ इयेषदृष्ट्वाब्रह्माणंमनसार्चयितुंप्रभुम् ॥२५॥ पादसंवाहनंकृ
त्वाकिंब्रह्माणंप्रपूजये ॥ इत्याकुलासमुत्तस्थौमत्वासाचगुरोर्गुरुम् ॥ २६ ॥ अर्घ्यपाद्या
दिकंकृत्वाब्रह्माणंसमपूजयत् ॥ संस्कृतायांतुशय्यायांविश्राममकरोदजः ॥ २७ ॥
एतस्मिन्नन्तरेभर्तासमुत्तस्थौस्वतल्पतः ॥ धर्मव्रतामपश्यन्सविप्रःक्रुद्धःशशापताम् ॥
॥ २८ ॥ पादसंवाहनंत्यक्त्वायस्मादाज्ञांविहायमे ॥ गतान्यत्रततःपापाच्छापदग्धा
शिलाभव ॥ २९ ॥ भर्त्राधर्मव्रताशप्तामरीचिंप्राहकोपिता ॥ शयानेत्वयिसंप्राप्तोब्र
ह्मात्वज्जनकोगुरुः ॥ ३० ॥ त्वयोत्थायहिकर्तव्यंस्वगुरोःपूजनंसदा ॥ मयातुधर्मचा
रिण्यातवकार्यंकृतेमुने ॥ ३१ ॥ अदोषाहंयतःशप्तातस्माच्छापंददामिते ॥ त्वंच
शापंमहादेवात्मत्तःप्राप्स्यस्यसंशयम् ॥ ३२ ॥ व्याकुलंतंपतिंदृष्ट्वाव्याकुलासाप्र
जापतिम् ॥ नत्वाशयानंब्रह्माणमग्निंप्रज्वाल्यचेंधनैः ॥३३॥ गार्हपत्येस्थिताचक्रेत
पःपरमदुष्करम् ॥ तथाशप्तोमरीचिश्चतपस्तेपेसुदारुणम् ॥ ३४ ॥ पतिव्रताया
स्तपसामरीचेस्तपसातथा ॥ इंद्रादयश्चसंतप्तागतास्तेशरणंहरिम् ॥ ३५ ॥ ऊचुः

क्षीरांबुधौसुप्तंसंतप्तास्तपसाहरे ॥ पतिव्रतायास्तपसात्रैलोक्यंरक्षकेशव ॥ ३६ ॥
इन्द्रादीनांवचःश्रुत्वाविष्णुर्धर्मव्रतांययौ ॥ एतस्मिन्नेवकालेतुप्रबुद्धोभगवानजः ॥
॥ ३७ ॥ ऊचुर्धर्मव्रतांदेवाअग्निस्थांसहकेशवाः ॥ अग्निमध्येतपःकर्तुंकेनशक्यंप
तिव्रते ॥३८॥ त्वयाकृतंयत्परमंसर्वलोकभयंकरम् ॥ वरंवरयधर्मज्ञेअस्मत्तोयदभी
प्सितम् ॥ ३९ ॥ विष्ण्वादीनांवचःश्रुत्वादेवान्धर्मव्रताब्रवीत् ॥ भर्तुःशापमशक्ताहं
निवर्तयितुमंजसा ॥ ४० ॥ दत्तोमरीचिनाशापोमह्यंसह्यपगच्छतु ॥ धर्मव्रतावचःश्रु
त्वाप्रोचुरेनांसुराःपुनः ॥ ४१ ॥ धर्मव्रतेधर्मपुत्रिशापोयंपरमर्षिणा ॥ दत्तस्तेननिरा
कर्तुंशक्योदेवद्विजातिभिः ॥ ४२ ॥ तस्मादन्यंवरंब्रूहियतोधर्मस्यसंस्थितिः ॥ भवे
द्वैत्रिषुलोकेषुवेदोक्तस्यशुभव्रते ॥ ४३ ॥ देवानांवचनंश्रुत्वादेवान्धर्मव्रताब्रवीत् ॥
भर्तुःशापान्मोचयितुंनशक्नुतद्विजामराः ॥ ४४ ॥ मह्यंवरंप्रयच्छध्वमेवंविधमनु
त्तमम् ॥ शिलाहंहिभविष्यामिब्रह्मांडेपावनीवरा ॥ ४५ ॥ नदीनदसरस्तीर्थदेवादि
भ्योतिपावनी ॥ ऋष्यादिभ्योमुनिभ्यश्चमुख्यदेवेभ्यएवच ॥ ४६ ॥ तीर्थान्यपिच
सर्वाणिमखाःक्षेत्रमुखास्तथा ॥ तिष्ठंतुदेवाःसकलादेव्यश्चमुनयस्तथा ॥ ४७ ॥ मू
र्तामूर्तस्वरूपेणपदरूपेणदेवताः ॥ व्यक्ताव्यक्तस्वरूपेणमयितिष्ठंतुसर्वदा ॥ ४८ ॥

मांदृष्ट्वासर्वलोकाश्चमुक्ताःपापोपपातकैः ॥ भवेयुर्देवशार्दूलाब्रह्मविष्णुमहेश्वराः ॥

॥ ४९ ॥ शिलास्थितेषुतीर्थेषुस्नानंकृत्वाचतर्पणम् ॥ श्राद्धंसपिंडकंयेषांविष्णुलोकं प्रयांतुते ॥ ५० ॥ गदाधरोदृश्यतीर्थंसर्वतीर्थोत्तमोत्तमम् ॥मुक्तिर्भवतुपितृणांकर्तृणां श्राद्धतःसदा ॥५१॥ जरायुजांडजावापिस्वेदजावापिचोद्भिजाः ॥ त्यक्त्वादेहंशिलायां तुयांतिविष्णुस्वरूपताम् ॥५२॥ यथार्चितेहरौसर्वेयज्ञाःपूर्णाभवंतिच ॥ तथाश्राद्धंतर्पणंचस्नानंवाक्षय्यमस्त्विह ॥ ५३ ॥ ममदेहेसुरेशानायेयजंतिशृतादिकम् ॥ अचिरेणापितेसिद्धाःसिद्धिभाजोभवंतिवै ॥५४॥ पितृणांकुलसाहस्र मात्मनासहितंनराः ॥ श्राद्धादिनासमुद्धृत्यविष्णुलोकंव्रजंतिते ॥ ५५ ॥ यावंत्यश्चसरिच्छ्रेष्टागंगाद्याश्चह्रदाः शुभाः ॥ समुद्राद्याःसरोमुख्यामानसाद्याःसुरेश्वराः ॥ ५६ ॥ एकोविष्णुस्त्रिधामूर्तिर्यावत्संकीर्त्यतेबुधैः ॥ तावच्छिलायांसर्वाणितीर्थानिसहदैवतैः ॥५७॥ सदातिष्ठंतुमुनयोगंधर्वाणांगणाश्चये ॥ यावद्भवतिब्रह्मांडंतावत्तिष्टतुवैशिला ॥ ५८ ॥ ममदेहेश्मरूपेचयेयजंतिशृतादिकम् ॥ जुह्वत्यग्नौतुतेषांवैअक्षय्यंचोपतिष्टतु ॥ ॥ ५९ ॥ अक्षय्यंतुभवेच्छ्राद्धंजपहोमतपांसिच ॥ शिलापर्वतरूपेण मयितिष्टंतुभोः सुराः ॥६०॥ देवरूपावचःश्रुत्वा देवाःप्रोचुः पतिव्रताम् ॥ त्वयायत्प्रार्थितंसर्वंतद्भविष्यत्य

१ प्रत्यक्षमूर्तिमत्तीर्थमित्यर्थः । २ जरायुजाःपञ्चेंद्रियाः । ३ अंडजास्त्रींद्रियचतुरिन्द्रियास्तिर्यगादयः । ४ स्वेदजा एकेन्द्रियद्वीन्द्रिया मत्कुणमशकादयः । ५ उद्भिज्जाअंकुरतृणवीरुधादयः ।०.

संशयम् ॥ ६१ ॥ गयासुरस्यशिरसिभविष्यसियदास्थिरा ॥ तदापादादि[1]रूपेणस्था
स्यामस्त्वयिसुस्थिराः ॥ ६२ ॥ वरंशिलायैदत्त्वैवंतदाचांतर्दधुःसुराः ॥ इतिश्रीवा
युपुराणे श्वेतवाराहकल्पेगयामाहात्म्येधर्मशिलामाहिमावर्णनंनामतृतीयोऽध्यायः ॥
॥ ३ ॥ सनत्कुमारउवाच ॥ वक्ष्येशिलायामाहात्म्यं शृणुनारदमुक्तिदम् ॥ यस्या
गायंतिदेवाश्चमाहात्म्यंमुनिपुंगव ॥१॥ शिलास्थितापृथिव्यांसादेवरूपातिपावनी ॥
विचित्राख्यंशिलातीर्थंत्रिषुलोकेषुविश्रुतम् ॥ २ ॥ तस्याःसंस्पर्शनाल्लोकाःसर्वेहरि
पुरंययुः ॥ शून्येलोकत्रयेजातेशून्यायमपुरीह्यभूत् ॥३॥ यमोगमद्ब्रह्मलोकंनत्वाब्रह्म
ह्माणमब्रवीत् ॥ अधिकारंगृहाणाथयमदंडंपितामह ॥ ४ ॥ यममूचेततोब्रह्मास्वगृहे
धारयस्वताम् ब्रह्मोक्तोधर्मराजस्तुगृहेतांसमधारयत् ॥ ५ ॥ यमोधिकारंस्वंचक्रे
पापिनांशासनादिकम् ॥ एवंविधागुरुतराशिलाजगतिविश्रुता ॥ ६ ॥ यथाविष्णुर्य
थाब्रह्मायथादेवोमहेश्वरः ॥ ब्रह्मांडेचयथामेरुस्तथेयंदेवरूपिणी ॥ ७ ॥ गयासुर
स्यशिरसिगुरुत्वाद्धारितायतः ॥ अतःपवित्रयोर्योगः पितॄणांमोक्षदायकः ॥८॥ ॥ प
वित्रयोगयोर्योगेहयमेधर्म[2]जोकरोत् ॥ भो[3]गार्थमागतान्दृष्ट्वाविष्ण्वाद्यानब्रवीच्छिलां
॥९॥ शिलास्थिता प्रतिज्ञांतुकुर्वंतुपितृमुक्तये ॥ तथेत्युक्त्वाशिलायांतुदेवाविष्ण्वाद

१ पादस्ताद्यवयवावशिष्टस्वरूपेणेत्यर्थः २ ब्रह्मा ३ यज्ञे हविर्दानलाभाय । नाः

यःस्थिताः ॥ १० ॥ शिलारूपेणमूर्ताश्वपदरूपेणदेवताः मूर्तामूर्तस्वरूपेणस्थिताः
सर्वेतदाज्ञया ॥ ११ ॥ दैत्यस्यमुंडपृष्ठेतुयस्मात्सासंस्थिताशिला ॥ तस्मात्समुं
डपृष्ठाद्रिःपितृणांब्रह्मलोकदः ॥ १२ ॥ आच्छादितःशिलापादःप्रभासेनाद्रिणाततः
भासितोभास्करेणासौप्रभासः परिकीर्तितः ॥ १३॥ प्रभासंहिविनिर्भिद्यशिलांगुष्ठो
विनिर्गतः ॥ अंगुष्ठास्थितईशोपिप्रभासेशःप्रकीर्तितः ॥ १४ ॥ शिलांगुष्ठैकदेशेयः
साचप्रेतशिलास्मृता ॥ पिंडदानाच्चतस्यांतुप्रेतत्वान्मुच्यतेनरः ॥ १५ ॥ रामोदेव्या
सहस्नातोरामतीर्थंततःस्मृतम् ॥ प्रार्थितोथमहानद्यारामःस्नातोभवेद्यदि ॥१६॥रा
मतीर्थंततोभूत्वात्रिषुलोकेषुविश्रुतम् ॥ जन्मान्तरशतंसाग्रंयन्मयादुष्कृतंकृतम् १६
तत्सर्वंविलयंयातुरामतीर्थाभिषेचनात् ॥ मंत्रेणानेनयः स्नात्वाश्राद्धंकुर्वीतमानवः
॥ १८ ॥ रामतीर्थेपिंडदस्तुविष्णुलोकंप्रयात्यसौ ॥ तथेत्युक्त्वास्थितोरामःसीतयाभ
रताश्रमे ॥१९॥ रामराममहाबाहोदेवानामभयंकर ॥ त्वांनमस्येहंदेवेशंममनश्यतु
पातकम् ॥२०॥ मंत्रेणानेनयःस्नात्वाश्राद्धंकृत्वासपिंडकम् ॥ प्रेतत्वात्तस्यपितरोविमु
क्ताःपितृतांययुः ॥ २१ ॥ आपस्त्वमसिदेवेशज्योतिषांपतिरेवच ॥ पापंनाशयमेदे
वमनोवाक्कायकर्मजम् ॥ २२॥ नमस्कृत्यप्रभासेशंभासमानंशिवंव्रजेत् ॥ तंचशंभुंनम

१ मोचयेत्पितॄनित्यपिपाठः ।

स्कृत्यकुर्याद्यमबलिंततः ॥ २३ ॥ रामेवनंगतेशैलंमागत्यभरतः स्थितः ॥ पितृपिंडादिकंकृत्वारामेशंस्थाप्यतत्रच ॥२४॥ रामंसीतांलक्ष्मणंचमुनीनूस्थापितवान्प्रभुः ॥ भरतस्याश्रमंपुण्यंनित्यंपुण्यद्रुमैर्वृतम् ॥२५॥ मतंगस्यपदंतत्रदृश्यतेसर्वमानवैः ॥ स्थापितंधर्मसर्वस्वंलोकस्यास्यनिदर्शनात् ॥ २६ ॥ मतंगस्यपदेश्राद्धीसर्वांस्तारयतेपितॄन् ॥ रामतीर्थेनरःस्नात्वारामंसीतांसमर्च्यच ॥ २७ ॥ रामेश्वरंप्रणम्याथआनंदीजायतेनरः ॥ शिलायाजघनंभूयः समाक्रांतंनगेनतु ॥२८॥ धर्मराजेनसंप्रोक्तोनगच्छेतिनगः स्मृतः ॥ यमराजधर्मराजौनिश्चलार्थंव्यवस्थितौ ॥ २९ ॥ ताभ्यांबलिंप्र[2]दास्यामिपितॄणांमुक्तिहेतवे ॥ द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौ ॥ ताभ्यांबलिंप्रदास्यामिस्यातामेतावहिंसकौ ॥ ३० ॥ शिलायादिक्षिणेहस्तेस्थापितः कुंडपर्वतः ॥ निमिषादित्यईशानभागएतेमहेश्वराः ॥ ३१ ॥ बहिर्द्वौवरुणौरुद्राश्चत्वारः पितृमोक्षदाः ॥ भरताश्रममासाद्यतेनतान्नत्यजेन्नरः ॥ ३२ ॥ पापेभ्यश्चोपपापेभ्योमुच्यतेपितृभिःसह ॥ यत्रकुत्रापिदेवर्षेभरतस्याश्रमेयतः ॥ ३३ ॥ स्नातः श्राद्धादिकंकृत्वातत्कल्पे[3]पिनहीयते ॥ गयायांचाक्षयंश्राद्धंजपहोमतपांसिच ॥३४॥ सर्वमानंत्य

१ श्राद्धमनेन कृतमित्यर्थः इति । ननु 'श्राद्धमनेस भुक्तमिनिठमौ' इतीतिः । २ प्रदास्यामि प्रदद्यादिति विधिः । ३ कल्पांतेऽपीत्यर्थः ।

माहूयदत्तंचभरताश्रमे ॥ चतुर्युगस्वरूपेणचतस्रश्चापिमूर्तयः ॥ ३५ ॥ दृष्टाः स्पृष्टाः
पूजितास्तुपितॄणांमुक्तिदायकाः ॥ मुक्तिवामनइत्येवतारकाख्योविधिःपरः ॥ ३६ ॥
त्रिविक्रमंचब्रह्माणंयःपश्येत्पुरुषोत्तमम् ॥ पितृभिः सहधर्मात्मासयातिपरमांगतिम्
॥ ३७॥ शिलायावामहस्तेपिस्थापितोह्यंतकोगिरिः ॥ यःपितुः पिंडदस्तत्रपितॄन्ब्रह्म
पुरंनयेत् ॥ ३८॥ नैमिषारण्यपार्श्वेतुईजेब्रह्मासुरैसह ॥ मुख्यसंज्ञंहितत्तीर्थंदेवास्त
त्रपदैःस्थिताः ॥ ३९ ॥ तेषुतेषुपदेष्वेवतीर्थेषुमुनिसत्तम ॥ यत्किंचिदशुभंकर्मतत्प्र
णश्यतिनारद ॥४०॥ तन्नैमिषवरंपुण्यंसेवितंपुण्यपूरुषैः ॥ तत्रव्यासः शुकः पैलःक
ण्वोवेधाःशिवोहरिः ॥ ४१ ॥ तेषांदर्शनमात्रेणमुच्यतेपातकैर्नरः ॥ वामहस्तेशिला
यास्तुतथाउद्यंतकोगिरिः ॥ ४२ ॥ सपर्वतःसमानीतोअगस्त्येनमहात्मना ॥ तत्रब्र
ह्माहरश्चैवतपश्चोग्रंचचक्रतुः ॥४३॥ तत्रागस्त्यस्यहिवरंकुंडंत्रैलोक्यदुर्लभम् ॥ यत्र
मूर्त्यष्टकंसिद्धंतपस्तप्त्वाशिवंगतम् ॥ ४४ ॥ कुंडेमूर्त्यष्टकंनत्वापितॄन्ब्रह्मपुरंनयेत् ॥
अगस्त्येनाथदेवर्षेउदयाद्रेर्महात्मनः ॥ ४५ ॥ शिलायावामहस्तेपिस्थापितोगिरि
राट्छुभः ॥ वादित्राद्यैर्दिव्यगीतैराद्योवादित्रकोगिरिः ॥ ४६ ॥ तत्राविद्याधरानाम
गंधर्वाप्सरसांगणैः ॥ सेवतेद्यापिगीतानिदिव्यानिसहगायति ॥ ४७॥ मोहनश्चसु
नीथश्चशैलूषोमोहनोत्तमः ॥ पर्वतोनारदोध्यानीसंगीतिःपुष्पदंतकः ॥ ४८ ॥ हा

हाहूहूप्रभृतयोगीतनादंप्रचक्रिरे ॥ तत्रचित्ररथोनामसर्वगंधर्वसंवृतः ॥ ४९ ॥ गा
यन्सुमधुराण्येवगीतान्यद्रौमहोत्सवः ॥ अतः सपर्वतोदेवैः सेव्यतेऽद्यापिनित्यशः
॥५०॥ धर्मोजस्तत्रदेवेशोहरोभस्मांगरागवान् ॥ पार्वत्यासहितोरुद्रःपर्वतेगीतनादि
ते ॥ ५१ ॥ मोदतेयाजितोध्यातःपितॄणांपरमागतिः ॥ गयायांपरमात्माहिदृश्यते
द्यापिमुक्तिदः ॥ ५२ ॥ ह्रियतेवैष्णवीमायातथारुद्रार्चनेमुने ॥ शिलायादाक्षिणेहस्ते
भस्मकूटोगिरिर्धृतः ॥ ५३ ॥धर्मराजेनतत्रास्तेअगस्त्यःसहभार्यया ॥ अगस्त्यस्य
पदेस्नातःपिंडदोब्रह्मलोकगः ॥५४॥ पितृभिःसहधर्मात्मापूज्यमानोदिवौकसाम् ॥ भ
गवांस्तत्रसंयम्यतपश्चोग्रंचचारह ॥ ५५॥ ब्रह्मणश्चवरंलेभमाहात्म्यंभुविदुर्लभम् ॥
लोपामुद्रातथाभार्यापितॄन्ब्रह्मपुरंनयेत् ॥ ५६ ॥ कुंडनाथस्तपस्तेपेसिताद्रेर्दक्षिणे
गिरौ ॥ वटोवटेश्वरस्तत्रस्थितश्चप्रपितामहः ॥५७॥ तदग्रेरुक्मिणीकुंडंपाश्चिमेकपि
लानदी ॥ कपिलेशोनदीतीरेअमासोमसमागमे ॥ ५८ ॥ कपिलायांनरःस्नात्वाक
पिलेशंसमर्च्यच ॥ कृतेश्राद्धेपिंडदानेपितरोमोक्षमाप्नुयुः ॥ ५९ ॥ तत्राग्निधारागि
रिवरादागतोद्यंतकान्ननु ॥ तत्रसारस्वतंकुंडंसरस्वत्योपकल्पितम् ॥ ६० ॥ शुक्रस्तत्र
सुतैःसार्धशंडमर्कादिभिःप्रभुः ॥ तत्रतत्रमुनींद्राणांपदेषुमुनिसत्तम ॥ ६१ ॥ श्राद्ध

१ अक्षराधिक्येन छंदोभंगस्यषेऽनभ्यासन्न दोषः [!]

पिंडादिकृत्स्नातःपितॄणांतारयेन्नरः ॥ शिलायावामहस्तेपिगृध्रकुटोगिरिर्धृतः॥६२॥गृ
ध्ररूपेणसंसिद्धस्तपस्तप्त्वामहर्षयः ॥ अतोगिरिर्गृध्रवटस्तत्रगृध्रेश्वरःस्थितः ॥६३॥
दृष्ट्वागृध्रेश्वरंनत्वायातिशंभोःपदंनरः ॥ तस्यगृध्रवटस्याधःपिंडदः शिवलोकभाक्[1] ॥
॥ ६४ ॥ तत्रगृध्रवटेनत्वाप्राप्तकामोदिवंव्रजेत् ॥ ऋणमोक्षंपापमोक्षंशिवंदृष्ट्वाशिवं
व्रजेत् ॥ ६५ ॥मूलक्षेत्रंचतत्रास्तेपिंडदःस्वर्नयेत्पितॄन् ॥ आदिपालेनागिरिणासमा
क्रांतंशिलोदरम् ॥ ६६॥ तत्रास्तेगजरूपेणविघ्नेशोविघ्ननाशनः ॥ तंदृष्ट्वामुच्यतेविघ्नैः
पितॄन्ब्रह्मपुरंनयेत् ॥६७॥ गयानाभौसुषुम्नायांपिंडदःस्वर्नयेत्पितॄन् ॥ शिलायावा
मपादेतुस्थापितःप्रेतपर्वतः ॥ ६८ ॥ धर्मराजेनपापाढ्योगिरिःप्रेतशिलाश्रयः ॥ पा
देनदूरेनिक्षिप्तःशिलायाःपापभावतः ॥ ६९ ॥ गतःशिलायाःसंसर्गात्प्रेतकूटः पवित्र
ताम् ॥ प्रेतकूटंचतत्रास्तेदेवास्तत्रपदेस्थिताः ॥ ७० ॥ तत्रपिंडादिकंकृत्वाप्रेतत्वान्मु
च्यतेनरः ॥ पृथक्स्थिताश्चबहवोविघ्नकारिणएवते ॥ ७१ ॥ श्राद्धादिकारिणांनृणां
तीर्थेपितृविमुक्तये ॥ प्रेताधानुष्करूपेणवरग्रहणकारकम् ॥ ७२ ॥ पादांकितामुंडपृ
ष्ठाममादेवीनिवासिनी ॥ तांदृष्ट्वासर्वलोकाश्चमुक्ताःपापोपपातकैः ॥ ७३ ॥ गयाशि
रसिपुण्येचसर्वपापविवर्जिते ॥ प्रेतादिवर्जितेयस्मात्ततोतिपावनंवरम् ॥७४॥ कीक

[1] शिवलोकं कल्याणं वा ।

टेषुगयापुण्यापुण्यंराजगृहंवनं ॥ च्यवनस्याश्रमंपुण्यंनदीपुण्यापुनः पुनः ॥ ७५ ॥
वैकुंठोलोहदंडश्चगृध्रकूटोथशौनकः॥ अत्रश्राद्धादिनासर्वान्पितॄन्ब्रह्मपुरंनयेत् ७६॥
क्रौंचरूपेणहिमुनिर्मुंडपृष्ठेतपोकरोत् ॥ तस्यपादांकितोयस्मात्क्रौंचपादस्ततःस्मृतः
॥ ७७ ॥ स्नातोजलाशयेतत्रनयेत्स्वर्गंस्वकंकुलम् ॥ बलिःकाकशिलायांचका
कमोक्षणमोक्षदः ॥ ७८ ॥ मुंडपृष्ठस्यसन्तौहिलोमशोलोमहर्षणः ॥ द्वावेतौपर
मंतप्त्वातपःसिद्धिंपरांगतौ ॥ ७९ ॥ आहूयताःसरिच्छ्रेष्टालोमशेनमहानदी ॥ सर
स्वतीवेत्रवतीचंद्रभागासरस्वती ॥ ८० ॥ कावेरीसिंधुवीराचचंदनाचसरिद्वरा ॥ वा
सिष्टीशरयूर्गंगायमुनागंडकीतथा ॥ ८१ ॥ महानदीवैतरणीनिःक्षीराचदिवौकसाम्॥
शरय्वलकनंदाचउदीचीकनकाह्वया ॥ ८२ ॥ कौशिकीब्रह्मदाज्येष्टासर्वाघौघविमो
चिका ॥ कृष्णावेणीचर्मण्वतीनद्योमुक्तिप्रदायिके ॥ ८३ ॥ आहूयसरितःश्रेष्ठालोम
शोलोमहर्षणः ॥ तपसस्तुप्रभावेननर्मदांमुनिपुंगवः ॥ ८४ ॥ तासुसर्वासुयःस्नात्वा
पिंडदः स्वर्नयेत्पितॄन् ॥ ब्रह्मयोनिंप्रविश्याथनिर्गच्छेद्यस्तुमानवः ॥ ८५ ॥ परंब्रह्म
सयातीहविमुक्तोयोनिसंकटात् ॥ निःक्षीरायांपुष्करिण्यांस्नातःश्राद्धादिकृन्नरः॥८६॥
कुर्यात्क्रौंचपदेदिव्येनियमाद्वासरत्रयम् ॥ सर्वान्पितॄन्नयेत्स्वर्गंपंचपापिनएवच ॥८७॥

१ च गोमति इत्यपि पाठः ।

जमार्द्दनोभश्मकूटेतस्यहस्तेतुपिंडदः ॥ आत्मनोप्यथवान्येषांसव्येनापितिलैर्विना
॥ ८८ ॥ जीवतांदधिसंमिश्रंसर्वेतेविष्णुलोकगाः ॥ यस्तुपिंडोमयादत्तस्तवहस्तेज
नार्द्दन ॥ ८९ ॥ यमुद्दिश्यत्वयादेवदेहिपिंडंमृतेप्रभो ॥ एषपिंडोगयादत्तस्तवहस्तेज
नार्द्दन ॥ ९० ॥ अंतकालेगतेमह्यंत्वंमेदाताभविष्यासि ॥ जनार्द्दननमस्तुभ्यंनमस्ते
पितृमोक्षद ॥ ९१ ॥ पितृमातर्नमस्तेस्तुनमस्तेपितृरूपिणे ॥ गयायांपितृरूपेणस्व
यमेवजनार्दनः ॥ ९२ ॥ तंध्यात्वापुंडरीकाक्षंमुच्यतेचऋणत्रयात् ॥ नमस्तेपुंडरी
काक्षऋणत्रयविमोचन ॥ ९३ ॥ लक्ष्मीकांतनमस्तेस्तुपितॄणांमोक्षदोभव ॥ वामजा
नुंचसंपात्यनत्वाभीमंजनार्दनम् ॥९४॥ श्राद्धंसपिंडकंकृत्वापितृभिर्विष्णुलोकभाक् ॥
पितृभिःसहधर्मात्माकुलानांचशतेनच ॥ ९५ ॥ शिलायांव्यक्तरूपेणव्यक्ताव्यक्तात्म
नास्थितः ॥ लक्ष्मीशोविबुधैः सार्द्धंतस्माद्देवमयीशिला ॥ ९६ ॥ इतिश्री
वायुपुराणेश्वेतवाराहकल्पेगयामाहात्म्येशिलावर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥
॥ नारदउवाच ॥ ॥ कथंव्यक्तस्वरूपेणास्थितश्चादिगदाधरः ॥ कथमव्यक्तरूपे
णव्यक्ताव्यक्तात्मनास्थितः ॥ १ ॥ कथंगदासमुत्पन्नाययाप्यादिगदाधरः ॥ गदा
लोलंकथंचासीत्सर्वपापक्षयंकरम् ॥ २ ॥ सनत्कुमारउवाच ॥ ॥ गदोनामासुरो
ह्यासीद्वज्राद्वज्रतरोदृढः ॥ प्रार्थितोब्रह्मणाप्रादात्स्वशरीरास्थिदुस्त्यजम् ॥ ३ ॥ ब्रह्मो

क्तोविश्वकर्मापिगदांचक्रेद्भुतांतदा ॥ तदस्थिवज्रनिष्पन्नांगदांस्वर्गेह्यधारयत् ॥ ४ ॥
हेतिरक्षोब्रह्मपुत्रस्तपस्तेपेसुदारुणम् ॥ दिव्यवर्षसहस्राणांशतंवायुमभक्षत ॥ ५ ॥
उन्मुखश्चोर्ध्वबाहुश्चपादांगुष्ठवरेणह ॥ एकेनतिष्ठतेव्यग्रः शीर्णपर्णानिलाश्रयः ॥
॥ ६ ॥ ब्रह्मादींस्तपसातुष्टान्वरंवव्रेवरप्रदान् ॥ देवैर्दैत्यैश्चशस्त्रास्त्रैर्विविधैर्मनुजैर
पि ॥ ७ ॥ कृष्णेशानस्यचक्राद्यैरवध्यःस्यांमहाबलः ॥ तथेत्युक्त्वांतर्हितास्तेहेतिर्देवा
नथाजयत् ॥ ८ ॥ इंद्रत्वमकरोद्धेतिर्भीताब्रह्महरादयः ॥ हरिंतेशरणंजग्मुरूचुर्हेति
जहीतितान् ॥ ९ ॥ ऊचेहरिरवध्योयंहेतिर्देवासुरैःसुराः ॥ महास्त्रंमेप्रयच्छध्वंहेतिंह
न्यांहितेनतम् ॥ १० ॥ इत्युक्तास्तेततोदेवागदांतांहरयेददुः ॥ दधारतांगदामाद्योदे
वैरुक्तोगदाधरः ॥ ११ ॥ गदयाहेतिमाहत्यदेवेभ्यस्त्रिदिवंददौ ॥ क्षालनार्थंगदाय
त्रलोलिताविष्णुनाभवत् ॥ १२ ॥ बभूवतद्गदालोलंतीर्थंपरमपावनम् ॥ गदयादावव
ष्टभ्यगयासुरशिरःशिलाम् ॥ १३ ॥ निश्चलार्थंस्थितोयस्मात्तस्मादादिगदाधरः ॥
शिलायांमुंडपृष्ठास्थिन निवासोनगपर्वतः ॥ १४ ॥ उद्यंतोगीतवादित्रोभस्मकुटोगिरि
र्महान् ॥ गृध्रकूटश्चित्रकूटोआदिपालोऽरविंदकः ॥ १५ ॥ क्रौंचपादोक्षय्यवटःफल्गु
तीर्थंमधुश्रवाः ॥ घृतकुल्यामधुकुल्यादेविकाचमहानदी ॥ १६ ॥ वैतरिण्यादि

नाव्यक्तरूपेणादिगदाधरः ॥ विष्णोःपदंरुद्रपदंब्रह्मणः पदमुत्तमम् ॥ १७ ॥ कश्यप

स्यपदंदिव्यंद्वौहस्तौयत्रानिर्गतौ ॥ पंचाग्नीनांपदान्यत्रइन्द्रागस्त्यपदेवरे ॥ १८ ॥ रवे
श्चकार्तिकेयस्यक्रौंचमातंगयोरपि ॥ दाधीचंचान्द्रगाणेशेकाण्वंचपदमुत्तमम् ॥१९॥
मुख्यलिंगानिसर्वाणिव्यक्ताव्यक्तात्मकान्यपि ॥ आद्योगदाधरश्चक्रव्यक्तःश्रीमान्
गदाधरः ॥ २० ॥ गायत्रीचैवसावित्रीत्रिसंध्येयंसरस्वती ॥ गयादित्यश्चोत्तराकोंद
क्षिणार्कोपिनैमिषः ॥ श्वेतार्कोगणनाथश्चवसवोऽष्टौमुनीश्वराः ॥ २१ ॥ रुद्राश्चैकाद
शैवाथतथासप्तर्षयोऽपरे ॥ सोमनाथश्चसिद्धेशः कपर्दीशोविनायकः ॥ २२ ॥ नारा
यणोमहालक्ष्मीर्ब्रह्माश्रीपुरुषोत्तमः ॥ मार्कण्डेयोऽथकोटीशोऽप्यंगिरेशः पितामहः ॥
॥ २३ ॥ जनार्दनोमंगलाचपुंडरीकाक्षउत्तमः ॥ इत्यादिव्यक्तरूपश्चास्थितश्चादिग
दाधरः ॥ २४ ॥ ब्रह्मणासहरुद्राद्यैः कारितेनिश्चलेऽसुरे ॥ तुष्टावाद्यंगदापाणिंवेधा
हर्षेणसंवृतः ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ [१]गदाधरंव्यपगतकालकल्मषंगयागतंगदित
गुणंगुणातिगम् ॥ गुहागतंगिरिवरगौरगेहगंगणार्चितंगदिनमहंसततंनमामि ॥ २६ ॥
[२]अहःश्रियंत्रिदशगणादिसुश्रियंभवाश्रियंदितिभवदारुणश्रियंम् ॥ कलिश्रियंकलिम

१ गदांबिभर्तीत्यसौगदाधरः विशेषेणअदगतौकालकल्मषौयस्मात् गयायांविद्यमानं गदिताः गुणाः यस्य असौतंगदि-
तगुण गुणा तिगंसत्वरजस्तमोगुणः अतिक्रांतास्थितिर्यस्य गुहागतंहृदयगुहागतं गिरिवरगौरगेहगंगिरिवरः कोलाहलस्तस्यगौरे-
शुद्धेगृहेवर्तमानं गणार्चितं गदास्यास्तीतिगदा तस्य ।

२ अहःश्रियं अहःश्रीर्यस्य त्रिदशगुणादिसुश्रियंत्रिदशगुणादौदेवगुणांसुष्टुश्रीर्यस्यभवश्रियंभवेसंसारेश्रीर्यस्य

मर्द्दनश्रियंगदाधरंनौमितमाश्रिताश्रियम् ॥ २७ ॥ दृढाद्दृढंपरिदृढगाढसंस्तुतंका
मादृतंसुदृढमरूढिरूढिगम् ॥ तमाद्यगंदृढदुरिताद्यढौकितंस्वढौकितंदृढतरगोत्रसू
क्तिभिः ॥ २८ ॥ विदेहकंकरणकलाविवर्जितंविजन्मकंदिनकरवेदिभूषितम् ॥ ग-
दाधरंध्वनिमुखवर्जितंपरंनमाम्यहंसततमनादिमीश्वरम् ॥ २९ ॥ मनोतिगंमतिग
तितर्जितंपरंसदद्वयंश्रुतिशिरसिस्तुतंबुधैः ॥ चिदात्मकंकलिगतकारणातिगंगदाधरं
हृदयगतंनमामिदेवम् ॥ ३० ॥ ॥ सनत्कुमार उवाच ॥ देवैःसार्द्धंब्रह्मणै
वंस्तुतश्चादिगदाधरः ॥ ऊचेवरान्वृणीष्वैवंवरंब्रह्मातमब्रवीत् ॥ ३१ ॥ शिलायां

दितिभवदारूणश्रियं दितिभवाः दैत्याः तेषुदारूणासंहाररूपाश्रीर्यस्यकलिश्रियंकलौश्रीर्यस्यकलियुगेयस्यस्मरणमा
त्रेणपापराशिर्नष्टोभवतीत्यर्थः कलिमलमर्द्दनश्रियंयस्यचरित्रश्रवणंकलौमलानिपापानितेषांमायश्चित्तरूपाश्रीर्यस्य आश्रितानां
श्रीर्यस्यप्रसादात् भवतिएतादृशं ॥ ३ ॥ दृढाद्दृढंवज्रादपिदृढं परिदृढगाढसंस्तुतंपरितोदृढाः ब्रह्मादयः तैरत्यंतंसंस्तुतं काया-
दृतंकामेनमदने नआदृतंअप्राप्तंसुदृढंअजरामरंअरूढिरूढिगंअप्रकटतयासर्वपदार्थेषुसंतं आढयेषुविभूत्यावर्तमानं दृढदुरिताड्यढा-
कितंवर्तमानमायाविभिरप्राप्तंदृढतरगोत्रसूक्तिभिः चिरंजीविनोयेमार्कंडेयादयः गोत्रभूतायेशिष्टादयः सूरयोज्ञानिनः तेषामुक्तिभिः
सुसंस्कृतवाग्भिः संस्तुतं ॥ ४ ॥ विदेहकंपांचभौतिकदेहरहितंकरणकलाविवर्जितं कार्य कलाविवर्जितंविजन्मकंजननादिरहि-
तंदिनकरवेदिभूषितंदिनकरः सूर्यस्तस्यवेदिर्मंडलंतत्रभूषितंदिनकरः ध्वनिमुखवर्जितम् वाक्यात्प्रत्यक्षंपरंउत्कृष्टम् ॥ ५ मनोति-
गंअमनोगोचरमतिवर्जितंबुधैरप्राप्तंसवद्वयंसद्रूपमेकं बुधैः ज्ञानिभिः श्रुतिशिरशिरसिस्तुतवेदांतवाक्येस्थितंचिदात्मकं चित्स्वरूपं
[illegible] कामक्रोधादीनियेषां तेषां अप्राप्तम् ॥

मर्द्दनश्रियंगदाधरंनौमितमाश्रिताश्रियम् ॥ २७ ॥ दृढादृदृढंपरिदृढगाढसंस्तुतंका
मादृतंसुदृढमरूढिरूढिगम् ॥ तमाद्यगंदृढदुरिताद्यढौकितंस्वढौकितंदृढतरगोत्रसू
क्तिभिः ॥ २८ ॥ विदेहकंकरणकलाविवर्जितंविजन्मकंदिनकरवेदिभूषितम् ॥ ग-
दाधरंध्वनिमुखवर्जितंपरंनमाम्यहंसततमनादिमीश्वरम् ॥ २९ ॥ मनोतिगंमतिग
तितर्जितंपरंसदद्वयंश्रुतिशिरसिस्तुतंबुधैः ॥ चिदात्मकंकलिगतकारणातिगंगदाधरं
हृदयगतंनमामिदेवम् ॥ ३० ॥ ॥ सनत्कुमार उवाच ॥ देवैःसार्द्धंब्रह्मणै
वंस्तुतश्चादिगदाधरः ॥ ऊचेवरान्वृणीष्वैवंवरंब्रह्मातमब्रवीत् ॥ ३१ ॥ शिलायां

दितिभवदारूणश्रियं दितिभवाः दैत्याः तेषुदारूणासंहाररूपाश्रीर्यस्यकलिश्रियंकलौश्रीर्यस्यकलियुगेयस्यस्मरणमा
त्रेणपापराशिर्नष्टोभवतीत्यर्थः कलिमलमर्द्दनश्रियंयस्यचरित्रश्रवणंकलौमलानिपापानितेषांप्रायश्चित्तरूपाश्रीर्यस्य आश्रितानां
श्रीर्यस्यप्रसादात् भवतिएताद्दशं ॥ ३ ॥ दृढादृदृढंवज्रादपिदृढं परिदृढगाढसंस्तुतंपरितोदृढाः ब्रह्मादयः तैरत्यंतंसंस्तुतं काया-
दृतंकामेनमदने नआदृतंअप्राप्तंसुदृढंअजरामरंअरूढिरूढिगंअप्रकटतयासर्वपदार्थेषुसंतं आढ्येषुविभूत्यावर्तमानं दृढदुरिताड्यढा-
कितंवर्तमानमायाविभिरप्राप्तंदृतरगोत्रसूक्तिभिः चिरंजीविनोयेमार्कंडेयादयः गोत्रभूतायेशिष्टादयः सूरयोज्ञानिनः तेषामुक्तिभिः
सुसंस्कृतवाग्भिः संस्तुतं ॥ ४ ॥ विदेहकंपांचभौतिकदेहरहितंकरणकलाविवर्जितं कार्य कलाविवर्जितंविजन्मकंजननादिरहि-
तंदिनकरवेदिभूषितांदिनकरः सूर्यस्तस्यवेदिर्मंडलंतत्रभूषितंदिनकरः ध्वनिमुखवार्जितम् वाक्यात्प्रत्यक्षंपरंउत्कृष्टम् ॥ ५ मनोति-
गंअमनोगोचरमतिवार्जितंबुधैरप्राप्तंसमद्वयंसद्रूपमेकं बुधैः ज्ञानिभिः श्रुतिशिराशिरासिस्तुतवेदांतवाक्येस्थितंचिदात्मकं चित्स्वरूपं
[illegible] तेषां अप्राप्तम् ॥

देवरूपिण्यांनतिष्टामस्त्वयाविना ॥ संस्थास्यामस्त्वयासार्द्धंनित्यंऽव्यक्तादिरूपिणा
॥३२॥ एवमस्तुश्रियासार्द्धंस्थितश्चादिगदाधरः ॥ लोकानांरक्षणार्थायजगतांमुक्ति
हेतवे ॥ ३३ ॥ सुव्यक्तः पुंडरीकाक्षोजनार्दनइतिश्रुतः ॥ देवैरगम्यायामूर्तिरादि
भूतासनातनी ॥ ३४ ॥ सुव्यक्तःश्वेतकल्पेतुभविष्यामितथापुनः ॥ वाराहकल्पेह्य
व्यक्तोदेवोमय्यगमत्पुरा ॥ ३५॥ संतारणायलोकानांदेवानांरक्षणायच ॥ गयाशिर
सिसुव्यक्तोभविष्यतिनसंशयः ॥ ३६ ॥ येद्रक्ष्यंतिसदाभक्त्यादेवमादिगदाधरम् ॥
कुष्टादिव्याधिनिर्मुक्तायास्यंत्तिहरिमंजसा ॥ ३७ ॥ येद्रक्ष्यंतिसदाभक्तयादेवमादि
गदाधरम् ॥ तेप्राप्स्यंतिधनंधान्यमायुरारोग्यमेवच ॥ ३७ ॥ कलत्रपुत्रपौत्रादि
गुणकीर्तिसुखानिच ॥ श्रद्धयायेनमस्यंतिराज्यंब्रह्मपुरंतथा ॥ ३७ ॥ भुक्त्वाव्रजेयुः
सततंपुण्यंपुण्यफलंनॄरः ॥ गंधदानेनगंधाढ्यःसौभाग्यंपुष्पदानतः ॥ ४० ॥ धूप
दानेनराज्याप्तिर्दीपाद्दीप्तिर्भविष्यति ॥ ध्वजदानात्पापहानिर्यात्राकृद्ब्रह्मलोकभाक्
॥ ४१ ॥ श्राद्धदिपिंडदानेनविष्णुंनयतिवैपितृन् ॥ श्राद्धदानेनयेदेवंमंत्रेणादिगदा
धरम् ॥ ४२ ॥ स्तोष्यंतियेसमभ्यर्च्यपितॄन्नेष्यंतिमाधवम् ॥ शिवोपिपरयाप्रीत्या
तुष्टावादिगदाधरम् ॥ ४३ ॥ ॥ शिवउवाच ॥ ॥ अव्यक्तरूपोयोदेवोमुंडपृष्ठा

१ प्रथमाबहुवचनमेतत् नृशब्दस्य ॥

द्रिरूपतः ॥ फल्गुतीर्थादिरूपेणनमाम्यादिगदाधरम् ॥ ४४ ॥ व्यक्तरूपोहियोदे
वोजनार्द्दनस्वरूपतः ॥ मुंडपृष्ठेस्वयंह्यास्तेनमा० ॥ ४५ ॥ शिलायांदेवरूपिण्यांस्थि
तोब्रह्मादिभिःसुरैः ॥ पूजितंसंस्तुतंदेवंनमा० ॥ ४६ ॥ महदादेश्चजगतोऽव्यक्तस्यैकं
हिकारणम् ॥ अव्यक्तंज्ञानरूपंतंनमा० ॥ ४७ ॥ यंचदृष्ट्वातथास्पृष्ट्वापूजयित्वाप्रण
म्यतम् ॥ श्राद्धाद्यैर्ब्रह्मलोकाप्तिर्नमा० ॥ ४८ ॥ देहेंद्रियमनोबुद्धिप्राणाहंकारवर्जि
तम् ॥ जाग्रत्स्वप्नविनिर्मुक्तंनमा० ॥ ४९ ॥ व्यक्ताव्यक्तस्वरूपेणपदरूपेणसंस्थित
म् ॥ मुखादिलिंगरूपेणनमाम्यादिगदाधरम् ॥ ५० ॥ नित्यानित्यविनिर्मुक्तंपरमा
नंदमव्ययम् ॥ तुरीयंज्योतिरात्मानंनमाम्यादिगदाधरम् ॥ ५० ॥ ॥ सनत्कुमार
उवाच ॥ ॥ एवंस्तुतोमहेशेनप्रीत्याह्यादिगदाधरः ॥ स्थितोदेवशिलायांचदेवैर्ब्र
ह्मादिभिःसुरैः ॥ ५२ ॥ संस्थितंमुंडपृष्ठाद्रौदेवमादिगदाधरम् ॥ स्तुवंतिपूजयंती
हविष्णुलोकंव्रजंतिते ॥ ५३ ॥ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ॥ कामान
वाप्नुयात्कामीमोक्षार्थीमोक्षमाप्नुयात् ॥५४॥ वंध्याचलभतेपुत्रमभ्यर्च्यादिगदाध
रम् ॥ राजाविजयमाप्नोतिशूद्रःसुखमवाप्नुयात् ॥५५॥ पुत्रार्थीलभतेपुत्रान्वेदवेदां
गपारगान् ॥ मनसाप्रार्थितंसर्वंपूजाद्यैःप्राप्नुयाद्धरेः ॥ ५६ ॥ इतिश्रीवायुपुराणेश्वेत
वाराहकल्पेगयामाहात्म्येपंचमोऽध्यायः ॥ ५ ॥

॥ सनत्कुमारउवाच ॥ ॥ गयायात्रांप्रवक्ष्यामिशृणुनारदमुक्तिदाम् ॥ निष्क्रांते
स्त्विहकर्तृणांब्रह्मणागीयतेपुरा ॥ १ ॥ उद्यतश्चेद्गयांगंतुंश्राद्धंकृत्वाविधानतः ॥ वि
धायकार्पटीवेषंकृत्वाग्रामंप्रदक्षिणम् ॥ २ ॥ ततोग्रामांतरंगत्वाश्राद्धशेषान्नभोजन
म् ॥ ततःप्रतिदिनंगच्छेत्प्रतिग्रहविवर्जितः ॥ ३ ॥ प्रतिग्रहादुपावृत्तःसंतुष्टोनियतः
शुचिः ॥ अहंकारनिवृत्तोयः सतीर्थफलमश्नुते ॥४॥ यस्यहस्तौचपादौचमनश्चापि
सुसंयतम् ॥ जितेंद्रियोदानशीलःसतीर्थफलमश्नुते ॥५॥ गृहाच्चलितमात्रेणगयायां
गमनंप्रति ॥ स्वर्गारोहणसोपानंपितृणांचपदेपदे ॥ ६ ॥ पदेपदेश्वमेधस्ययत्फलंग
च्छतोगयाम् ॥ तत्फलंलभतेपुण्यंसमग्रंनात्रसंशयः ॥ ७ ॥ ततोगयांसमासाद्यब्र
ह्मचारीसमाहितः ॥ अश्वमेधमवाप्नोतिगमनादेवनारद ॥ ८ ॥ ततोगयाप्रवेशेतु
पूर्वतोस्तिमहानदी ॥ तत्रतोयंसमुत्पाद्यस्नातव्यंनिर्मलेजले ॥ ९ ॥ देवादींस्तर्पयि
त्वातुश्राद्धंकृत्वायथाविधि ॥ स्ववेदशाखागदितमर्घ्यावाहनवर्जितम् ॥१०॥ अपरेह्नि
शुचिर्भूत्वागच्छेच्चप्रेतपर्वतम् ॥ ब्रह्मकुंडेततःस्नात्वादेवादींस्तर्पयेत्सुधीः ॥ ११ ॥
कुर्याच्छ्राद्धंसपिंडानांप्रयतः प्रेतपर्वते ॥ प्राचीनावीतिनाभाव्यंदक्षिणाभिमुखः स्मर
न् ॥१२॥ कव्यवाहोनलः सोमोयमश्चैवार्यमातथा ॥ अग्निष्वात्ताबर्हिषदःसोमपाः १५
पितृदेवताः ॥ १३ ॥ आगच्छंतुमहाभागायुष्माभीरक्षितास्त्विह ॥ मदीयाःपितरोये

चकुलेजाताःसनाभयः ॥ १४ ॥ तेषांपिंडप्रदानार्थमागतोस्मिगयामिमाम् ॥ तेस
वैंतृप्तिमायांतुश्राद्धेनानेनशाश्वतीम् ॥ १५ ॥ आचम्योक्त्वातुपंचागंप्राणायामंतुयत्न
तः ॥ पुनरावृत्तिरहितब्रह्मलोकाप्तिहेतवे ॥ १६ ॥ एवंचविधिवच्छ्राद्धंकृत्वापूर्वंयथाक्रम
म् ॥ पितॄनावाह्यचाभ्यर्च्यमंत्रैःपिंडप्रदोभवेत् ॥ १७ ॥ तीर्थेप्रेतशिलाद्रौचचरुणा
सघृतेनच ॥ प्रक्षाल्यपर्वतस्थानंपंचगव्यैःपृथक्पृथक् ॥ १८ ॥ स्वमंत्रैरथसंपूज्य
पदेचपददैवतम् ॥ यावत्तिलामनुष्यैश्चगृहीताःपितृकर्मसु ॥ १९ ॥ गच्छंतिभीता
स्त्वसुराःसिंहंदृष्ट्वायथामृगाः ॥ अष्टकासुचवृद्धौचगयायांचमृतेऽहनि ॥ २० ॥ मातुः
श्राद्धंपृथक्कुर्यादन्यत्रपतिनासह ॥ वृद्धिश्राद्धंतुमात्रादिगयायांपितृपूर्वकम् ॥ २१ ॥
पादपूर्वंसमारभ्यदक्षिणाग्रैःकुशैःक्रमात् ॥ पित्रादीनांसमास्तीर्यतेषांगृह्योक्तमाचरे
त् ॥ २२ ॥ सक्तुनामुष्टिमात्रेणदद्यादक्षय्यपिंडकम् ॥ तिलाज्यमधुदध्यादीन्पिंड
द्रव्येषुयोजयेत् ॥ २३ ॥ संबंधिनस्तिलाद्भिश्चकुशेष्वावाहयेत्ततः ॥ आब्रह्मस्तंब
पर्यंतंदेवर्षिपितृमानवाः ॥ २४ ॥ तृप्यंतुपितरःसर्वेमातृमातामहादयः ॥ अतीत
कुलकोटीनांसप्तद्वीपनिवासिनाम् ॥ २५ ॥ आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदक
म् ॥ पितापितामहश्चैवतथैवप्रपितामहः ॥ २६ ॥ मातापितामहीचैवतथैवप्रपि

तामही ॥ मातामहस्तत्पिताचप्रमातामहकादयः ॥ २७ ॥ तेषांपिंडोमयादत्तोह्य

क्षय्यमुपातिष्ठतु ॥ मुष्टिमात्रप्रमाणंचआर्द्रामलकमात्रकम् ॥ २८ ॥ शमीपत्रप्रमाणे
१६ नपिंडंदद्याद्गयाशिरे ॥ उद्धरेत्सप्तगोत्राणांकुलमेकोत्तरंशतम् ॥ २९ ॥ पितुर्मातुश्च मा.
भार्यायाभगिन्यादुहितुस्तथा ॥ पितृष्वसुर्मातृभगिन्याःसप्तगोत्राःप्रकीर्तिताः ॥ अ.६
॥ ३० ॥ चतुर्विंशश्चविंशश्चषोडशद्वादशैवहि ॥ रुद्रादशवसुश्चैवकुलान्येकोत्तरंश
तम् ॥ ३१ ॥ अस्मत्कुलेमृतायेचगतिर्येषांनविद्यते ॥ आवाहयिष्येतान्सर्वान्कु
शपृष्ठेतिलोदकैः ॥ ३२ ॥ मातामहकुलेयेचगतिर्येषांनविद्यते ॥ आवाहयिष्येता
न्सर्वान्कुशपृष्ठेतिलोदकैः ॥ ३३ ॥ बंधुवर्गकुलेयेचगतिर्येषांनविद्यते ॥ आवाहयिष्ये
तान्सर्वान्गतिर्येषांनविद्यते ॥ ३४ ॥ इत्येतैःसजलैर्मंत्रैर्दर्भेषुध्यानवान्पितॄन् ॥ आ
वाह्याभ्यर्च्यतेभ्यश्चपिंडान्दद्याद्यथाक्रमम् ॥ ३५ ॥ अस्मत्कुलेमृतायेचगतिर्येषांन
विद्यते ॥ तेषामुद्धरणार्थायइमंपिंडंददाम्यहम् ॥ ३६ ॥ मातामहकुलेयेचगतिर्येषांन
विद्यते ॥ तेषामुद्धरणार्थायइमंपिंडंददाम्यहम् ॥ ३७ ॥ बंधुवर्गकुलेयेचगतिर्येषां
नविद्यते ॥ तेषामुद्धरणार्थाय० ॥ ३८ ॥ अजातदंतायेकेचिद्येचगर्भेप्रपीडिताः ॥ ते
षामुद्धरणा० ॥ ३९ ॥ अग्निदग्धाश्चयेकेचिन्नाग्निदग्धास्तथापरे ॥ विद्युच्चौरहताये
चतेभ्यःपिंडंददाम्यहम् ॥ ४० ॥ दावदाहेमृतायेचसिंहव्याघ्रहताश्चये ॥ दंष्ट्रिभिःशृं
गिभिर्वापितेभ्यःपिंडंददाम्यहम् ॥ ४१ ॥ उद्बंधनमृतायेचाविषशस्त्रहताश्चये ॥ आ १६

त्मनोघातिनोयेचतेभ्यःपिंडंददाम्यहम् ॥४२॥ अरण्येवर्त्मनिरणेक्षुधयातृषयाहताः ॥
भूतप्रेतपिशाचाश्चतेभ्यःपिंडंददाम्यहम् ॥ ४३ ॥ रौरवेचांधतामिस्रेकालसूत्रेचये
गताः ॥ तेषामुद्धरणार्थायइमंपिंडंददाम्यहम् ॥ ४४ ॥ असिपत्रवनेघोरेकुंभीपाके
चयेगताः ॥ तेषामुद्धरणा० ॥ ४५ ॥ अनेकयातनासंस्थाः प्रेतलोकंचयेगताः ॥
तेषामुद्धरणार्था० ॥४६॥ असंख्ययातनासंस्थायेनीतायमशासनैः ॥ तेषामुद्धरणा
र्था० ॥४७॥ नरकेषुसमस्तेषुयातनायांचसंस्थिताः ॥ तेषामुद्धरणा० ॥४८॥ पशुयो
निगतायेचपक्षिकीटसरीसृपाः ॥ अथवावृक्षयोनिस्थास्तेभ्यःपिंडंददाम्यहम् ॥४९॥
जात्यंतरसहस्रेषुभ्रमंतःस्वेनकर्मणा ॥ मानुष्यंदुर्लभंयेषांतेभ्यःपिंडंददाम्यहम् ॥५०॥
दिव्यंतरिक्षभूमिष्ठाऽपितरोबांधवादयः ॥ मृताअसंस्कृतायेचतेभ्यः पिंडंददाम्यहम् ॥
॥५१॥येकेचित्प्रेतरूपेणवर्तंतेपितरोमम ॥ तेसर्वेतृप्तिमायांतुपिंडेनानेनशाश्वतीम् ॥
॥५२॥ येऽबांधवाबांधवावायेन्यजन्मनिबांधवाः ॥ तेषांपिंडोमयादत्तोह्यक्षय्यमुपति
ष्ठतु ॥५३॥ पितृवंशेमृतायेचमातृवंशेतथैवच ॥ गुरुश्वशुरबंधूनांयेचान्येबांधवादयः
॥५४॥ येमेकुलेलुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगतायेचजात्यंधाः पंगव
स्तथा ॥ ५५ ॥ विरूपाआमगर्भाश्चज्ञाताऽज्ञाताःकुलेमम ॥ धर्मपिंडोमयादत्तोह्यक्ष
य्यमुपतिष्ठतु ॥ ५६ ॥ आब्रह्मणोयेपितृवंशजातामातुस्तथावंशभवामदीयाः ॥ वंश

द्वयास्मन्ममदासभूताभृत्यास्तथैवाश्रितसेवकाश्च ॥ ५७ ॥ मित्राणिसख्यः पशवश्च
वृक्षादृष्टाश्चस्पृष्टाश्चकृतोपकाराः ॥ जन्मांतरेयेममसंगताश्चतेभ्यः स्वधापिंडमहंद
दामि ॥५८॥ एतांश्चसर्वमंत्रांश्चस्त्रीलिंगांतानूसमूह्यच ॥ पिंडंदद्याद्यथापूर्वस्त्रीणांमा
त्रादिकानूक्रमात् ॥ ५९ ॥ स्वगोत्रेपरगोत्रेचदंपत्योः पिंडदानतः ॥ अपृथकूनिष्फ
लंश्राद्धंपिंडेषूदकतर्पणम् ॥ ६० ॥ पिंडपात्रेतिलानूकृत्वापूरयित्वाशुभोदकैः ॥ परिषि
च्यत्रिधासर्वान्प्रणिपत्यक्षमापयेत् ॥ ६१ ॥ क्षमापनमंत्रः ॥ ॥ येचवोत्रयेचास्मा
नाशंसंते याश्चवोत्रयाश्चास्मानाशंसंते तेचवहंतांताश्चवहंताम् तृप्यंतुभवंतस्तृप्यं
तुभवत्यस्तृप्यततृप्यततृप्यत ॥ पुत्रान्पौत्रानभिवर्द्धयंतीरापोमधुमतीरिमाः स्वधांपि
तृभ्योअमृतंदुहानाआपोदेवीरुभयांस्तर्पयतु ॥ पितॄनूविसृज्यचाचम्यसाक्षिणः श्राव
येत्सुरानू ॥ साक्षिणः संतुमेदेवाब्रह्मेशानादयस्तथा ॥ ६२ ॥ मयागयांसमासाद्य
पितृणांनिष्कृतिःकृता ॥ आगतोस्मिगयांदेवपितृकार्येगदाधर ॥ ६३ ॥ त्वमेवसा
क्षीभगवन्ननृणोहमृणत्रयात् ॥ सर्वस्थानेषुचैवंस्यात्पिंडदानंतुनारद ॥ ६४ ॥ प्रे
तपर्वतमारुह्यकुर्यात्तीर्थेषुचक्रमात् ॥ तिलमिश्राँस्ततः सक्तून्निक्षिपेत्प्रेतपर्वते ॥ १७
॥ ६५ ॥ अपसव्येनदेवर्षेदक्षिणाभिमुखंक्रमात् येकेचित्प्रेतरूपेणवर्ततेपित

१ हृष्टाश्चेति पाठः २ पुष्टाश्चेति पाठः ३ मातुपितामहीप्रपितामहीत्यादिक्रमात् ।

रोमम ॥ ६६ ॥ तेसर्वेंतृप्तिमायांतुसक्तुभिस्तिलमिश्रितैः ॥ आब्रह्मस्तंबपर्यंतंय
त्किंचित्सचराचरम् ॥ ६७ ॥ मयादत्तेनतोयेनतृप्तिमायांतुसंर्वशः ॥ प्रेतत्वाच्चविमु
क्ताःस्युः पितरस्तस्यनारद ॥ ६८ ॥ प्रेतत्वंतस्यमाहात्म्यात्कुलेचापिनविद्यते ॥ ना
म्नाप्रेतशिलाख्यातागयाशिरसिमुक्तये ॥ ६९ ॥ तीर्थमंत्रादिरूपेणस्थितश्चादिग
दाधरः ॥ ७० ॥ ॥ इति श्रीवायुपुराणेश्वेतवाराहकल्पेगयामा० षष्टोऽध्यायः ॥६॥
॥ सनत्कुमारउवाच ॥ ॥ आदौतुपंचतीर्थेषुचोत्तरेमानसेविधिः ॥ आचम्यकुश
हस्तेनशिरश्चाभ्युक्ष्यवारिणा ॥१॥ उत्तरेमानसेगच्छन्मंत्रेणस्नानमाचरेत् ॥ उत्तरे
मानसेस्नानंकरोम्यात्मविशुद्धये ॥ २ ॥ सूर्यलोकादिसंसिद्धिसिद्धयेपितृमुक्तये ॥
स्नात्वाथतर्पणंकृत्वाश्राद्धंकृत्वासपिंडकम् ॥ ३ ॥ मानसंहिसरोयस्मात्तस्मादुत्तर
मानसम् ॥ सूर्यंनत्वार्चयित्वाथसूर्यलोकंनयेत्पितॄन् ॥ ४ ॥ ॐनमोभानवेभर्त्रेसोम
भौमज्ञरूपिणे ॥ जीवभार्गवशनैश्चरराहुकेतुस्वरूपिणे ॥ ५ ॥ उत्तरान्मानसान्मौ
नीव्रजेद्दक्षिणमानसम् ॥ दक्षिणेमानसेचैवतीर्थत्रयमुदाहृतम् ॥ ६ ॥ स्नात्वातेषुविधा
नेनकुर्याच्छ्राद्धंपृथक्पृथक् ॥ उदीचतीर्थमित्युक्तंतत्रोदीच्यांविमुक्तिदम् ॥ ७ ॥ अ
त्रस्नातोदिवंयातिस्वशरीरेणमानवः ॥ मध्येकनखलंतीर्थंत्रिषुलोकेषुविश्रुतम् ॥८॥

१ योयेकेचिदितिमन्त्रौपठित्वासक्त्वादिमिश्रितंजलंददातितस्येत्यर्थः ।

स्नात्वाकनकवद्भातिनरायातिपवित्रताम् ॥ तस्यदक्षिणभागेचतीर्थंदक्षिणमानसम्
॥ ९ ॥ दक्षिणेमानसेस्नानंकरोम्यात्मविशुद्धये ॥ सूर्यलोकादिसंशुद्धिसिद्धयेपितृमु
क्तये ॥ १० ॥ ब्रह्महत्यादिपापौघघातनायाविमुक्तये ॥ दिवाकरकरोमीहस्नानंद
क्षिणमानसे ॥ ११ ॥ सूर्यंनत्वाचस्मृत्वाचसूर्यलोकंनयेत्पितॄन् ॥ नमामिसूर्यतृप्त्य
र्थंपितॄणांतारणायवै ॥१२॥ पुत्रपौत्रधनैश्वर्यायुरारोग्याभिवृद्धये ॥ अनेनस्नानपूजा
दिकुर्याच्छ्राद्धमनुत्तमम् ॥१३॥ कृत्वानत्वाचमौनार्कमिमंमंत्रमुदीरयेत् ॥ फल्गुतीर्थे
व्रजेत्तस्मात्सर्वतीर्थोत्तमोत्तमम् ॥१४॥ मुक्तिर्भवतिपितॄणांकर्तॄणांतारणायच ॥ ब्रह्म
णाप्रार्थितोविष्णुःफल्गुरूपोऽभवत्पुरा ॥ १५ ॥ दक्षिणाग्निहुतंनूनंतद्भवंफल्गुती
र्थकम् ॥ तीर्थानियानिसर्वाणिभुवनेष्वखिलेष्वपि॥१६॥ तानिस्नातुंसमायांतिफल्गु
तीर्थेसुरैःसह ॥ गंगापादोदकंविष्णोःफल्गुर्ह्यादिगदाधरः ॥ १७ ॥ स्वयंहिद्रवरूपेण
तस्माद्गंगाधिकंविदुः ॥ अश्वमेधसहस्राणांसहस्रंयःसमाचरेत् ॥ १८ ॥ नासौत
त्फलमाप्नोतिफल्गुतीर्थेयदाप्नुयात् ॥ फल्गुतीर्थेविष्णुजलेकरोमिस्नानमादृतः ॥
॥ १९ ॥ पितॄणांविष्णुलोकायभुक्तिमुक्तिप्रसिद्धये ॥ फल्गुतीर्थेनरःस्नात्वातर्प
णंश्राद्धमाचरेत् ॥ २० ॥ सपिंडकस्वसूत्रोक्तंनमेदथपितामहम् ॥ नमःशिवायदे
वायईशानपुरुषायच ॥ २१ ॥ अघोरवामदेवायसद्योजातायशंभवे ॥ फल्गुतीर्थेन

रःस्नात्वाद्दष्ट्वादेवंगदाधरम् ॥ २२ ॥ आत्मानंतारयेत्सद्योदशपूर्वान्दशापरान् ॥
नत्वागदाधरंदेवंमंत्रेणानेनपूजयेत् ॥ २३ ॥ ॐ नमोवासुदेवायनमःसंकर्षणाय
च ॥ प्रद्युम्नायानिरुद्धायश्रीधरायचविष्णवे ॥ २४ ॥ पंचतीर्थ्यांनरःस्नात्वाब्रह्मलो
कंनयेत्पितॄन् ॥ अमृतैःपंचभिःस्नानंपुष्पवस्त्राद्यलंकृतम् ॥ २५ ॥ नकुर्याद्योगदापा
णितस्यश्राद्धमपार्थकम् ॥ नागकूटाद्गृध्रकूटाद्यूपाच्चोत्तरमानसात् ॥ २६ ॥ एतद्गया
शिरःप्रोक्तंफल्गुतीर्थंतदुच्यते ॥ मुंडपृष्टान्नगाधस्तात्फल्गुतीर्थमनुत्तमम् ॥ २७ ॥ तत्र
श्राद्धादिनासर्वेपितरोमोक्षमाप्नुयुः ॥ मुखंगयासुरस्यैतत्तस्माच्छ्राद्धमथाक्षयम् ॥२८॥
प्रथमेह्निविधिःप्रोक्तोद्वितीयेदिवसेव्रजेत्॥धर्मारण्येतत्रधर्मंतस्माद्यज्ञमकारयत् ॥२९॥
गच्छताब्रह्मलोकाप्तिंभवत्येवंहिनारद ॥ मतंगवाप्यांयःस्नात्वातर्पणंश्राद्धमाचरेत् ॥
गत्वानत्वामतंगेशमिमंमंत्रमुदीरयेत् ॥ ३० ॥ प्रमाणंदेवताःसंतुलोकपालाश्चसा
क्षिणः ॥ मयागत्यामतंगेऽस्मिन्पितॄणांनिष्कृतिःकृता ॥ ३१ ॥ तत्कूपयूपयोर्मध्ये
सर्वांस्तारयतेपितॄन् ॥ धर्मंधर्मेश्वरंनत्वामहाबोधितरुंनमेत् ॥ ३२ ॥ नमस्तेऽश्वत्थ
राजायब्रह्मविष्णुमहेश्वर ॥ बोधिद्रुमायपितॄणांकर्तॄणांतारणायच ॥ ३३ ॥ एकाद
शोऽसिरुद्राणांवसूनामष्टमोवसुः ॥ नारायणोसिदेवानांवृक्षराजोसिपिप्पल ॥ ३४ ॥

अश्वत्थरूपिणंदेवंशंखचक्रगदाधरम् ॥ नमामिपुंडरीकाक्षंशंखरूपधरंहरिम् ॥३५॥ ये

ऽस्मत्कुलमातृवंशबाधवादुर्गातिगताः ॥ त्वद्दर्शनात्स्पर्शनाच्चस्वर्गातयाततऽक्षयाम्
॥ ३६ ॥ ऋणत्रयंमयादत्तंगयामागत्यवृक्षराट् । त्वत्प्रसादान्महापापाद्विमुक्तोऽहंभ
वार्णवात् ॥३७॥ तृतीयेब्रह्मशिरसिस्नात्वाश्राद्धंसपिंडकम् ॥ कृत्वासर्वप्रमाणेनमंत्रे
णविधिवत्सुतः ॥ ३८ ॥ स्नानंकरोमितीर्थेऽस्मिन्नृणत्रय विमुक्तये ॥ श्राद्धायपिंडदा
नायतर्पणायविशुद्धये ॥ ३९ ॥ तत्कूपयूपयोर्मध्येब्रह्मलोकेनयेत्पितॄन् ॥ गयांकृत्वो
च्छ्रितोयूपोब्रह्मणायूपइत्यपि ॥ ४० ॥ कृत्वाब्रह्मसरःश्राद्धंसर्वांस्तारयतेपितॄन् ॥
यूपंप्रदक्षणीकृत्यवाजपेयफलंलभेत् ॥ ४१॥ ब्रह्माणंचनमस्कृत्यब्रह्मलोकंनयेत्पितॄन्
॥ ॐनमोब्रह्मणेऽजायजगज्जन्माधिकारिणे ॥ ४२ ॥ भक्तानांचपितॄणांचतारणाय
नमोनमः ॥ गोप्रचारसमीपस्थाआम्राब्रह्मप्रकल्पिताः ॥ ४३ ॥ तेषांसिंचनमात्रेण
पितरोमोक्षगामिनः ॥ आम्रंब्रह्मसरोद्भूतंसर्वदेवमयंतरुम् ॥ विष्णुरूपंप्रसिंचामि
पितॄणांमुक्तिहेतवे ॥ ४४ ॥ एकोमुनिःकुंभकुशाग्रहस्तआम्रस्यमूलेसलिलंददानः ॥
आम्राश्चसिक्ताःपितरश्चतृप्ताएकाक्रियाद्व्यर्थकरीप्रसिद्धा ॥ ४५ ॥ ततोयमबलिंक्षि
प्त्वामंत्रेणानेनसंयुतः ॥ यमराजधर्मराजौनिश्चलार्थंव्यवास्थितौ ॥ ४६ ॥ ताभ्यांब
लिंप्रदास्यामिपितॄणांमुक्तिहेतवे ॥ ततःश्वानबलिंक्षिप्त्वामंत्रेणानेनसंयुतः ॥ ४७ ॥ १९
श्वानौद्वौश्यामशबलौवैवस्वतकुलोद्भवौ ॥ ताभ्यांबलिंप्रदास्यामिरक्षेतांपथिसर्वदा

॥ ४८ ॥ततःकाकबलिंक्षिप्त्वापुनःस्नानंसमाचरेत् ॥ ऐंद्रवारुणवायव्यायाम्यांवैनै
र्ऋतास्तथा ॥ ४० ॥ वायसाःप्रतिगृह्णंतुभूम्यांपिंडंमयोज्झितम् ॥ फल्गुतीर्थेचतुर्थे
ऽह्निगत्वास्नानादिकंचरेत् ॥ ५० ॥ गयाशिरसियच्छ्राद्धंपदेकुर्यात्सपिंडकम् ॥ सा
क्षाद्गयाशिरस्तत्रफल्गुतीर्थाश्रितंकृतम् ॥ ५१ ॥ नगाज्जानार्द्दनाद्ब्रह्मकूपादुत्तरमान
सात् ॥ एतद्गयाशिरःप्रोक्तंफल्गुतीर्थंतदुच्यते ॥ ५२ ॥ पितामहंसमासाद्ययावदु
त्तरमानसात् ॥ फल्गुतीर्थंतुविज्ञेयंदेवानामपिदुर्लभम् ॥ ५३ ॥ क्रौंचपादात्फल्गु
तीर्थंयावत्साक्षाद्गयाशिरः ॥ मुखंगयासुरस्यैवतस्माच्छ्राद्धमथाक्षयम् ॥ ५४ ॥
मुंडपृष्ठान्नगाधस्तात्साक्षात्तत्फल्गुतीर्थकम् ॥ आद्योगदाधरोदेवोऽव्यक्ताव्यक्तोऽव्यव
स्थितः ॥ ५५ ॥ विष्ण्वादिपदरूपेणापितृणांमुक्तिहेतवे ॥ तत्रविष्णुपदंह्दिव्यंदर्शनंपा
पनाशनम् ॥५६॥ स्पर्शनंपूजनंचैवपितृणांदत्तमक्षयम् ॥ श्राद्धंसपिंडकंकृत्वाकुल
साहस्रमात्मनः ॥ ५७ ॥ नयेद्विष्णुपदंदिव्यमनंतंशिवमव्ययम् ॥ श्राद्धंकृत्वारुद्र
पदेनयेत्कुलशतंनरः ॥ ५८ ॥ सहात्मानंशिवपुरंतथाब्रह्मपदेनरः ॥ ब्रह्मलोकंकुल
शतंसमुद्धृत्यनयेत्पितॄन् ॥ ५९ ॥ दक्षिणाग्निपदेश्राद्धंवाजपेयफलंलभेत् ॥ गार्हपत्य
पदेश्राद्धीराजसूयफलंलभेत् ॥ ६० ॥ श्राद्धंकृत्वाहवनीयेपदेऽश्वमेधफलंलभेत् ॥
श्राद्धंकृत्वासभ्यपदेज्योतिष्टोमफलंलभेत् ॥ ६१ ॥ आवसथ्यपदेश्राद्धीसोमलोकं

नयेत्पितॄन् ॥ श्राद्धंकृत्वाशक्रपदेइन्द्रलोकमवाप्नुयात् ॥ ६२ ॥ अगस्त्यस्यपदेश्रा
द्धीपितॄन्ब्रह्मपुरंनयेत् ॥ क्रौंचमातंगयोःश्राद्धीब्रह्मलोकेनयेत्पितॄन् ॥ ६३ ॥ श्राद्धी
सूर्यपदेपंचपापिनोऽर्कपुरंनयेत् ॥ कार्तिकेयपदेश्राद्धीशिवलोकंनयेत्पितॄन् ॥ ६४ ॥
गणेशस्यपदेश्राद्धीरुद्रलोकंनयेत्पितॄन् ॥ गजकर्णिकायांतर्पणकृन्निर्मलंस्वंर्नयेत्पि[1]
तॄन् ॥ ६५ ॥ अन्येषांचपदेश्राद्धीपितॄन्ब्रह्मपुरंनयेत् ॥ सर्वेषांकश्यपंश्रेष्ठंविष्णो
रुद्रस्यवापदम् ॥ ६६ ॥ ब्रह्मणोऽपिपदंश्रेष्ठंसर्वेषांतत्रकीर्तितम् ॥ प्रारंभेचसमा
प्तौचतेषामन्यतमंस्मृतम् ॥ ६७ ॥ श्रेयस्करंभवेत्तत्रश्राद्धकर्तुश्चनारद ॥ कश्यपस्य
पदेदिव्येभारद्वाजोमुनिःपुरा ॥ ६८ ॥ श्राद्धंकृत्वोद्यतोदातुंपित्रादिभ्यश्चपिंडकम् ॥
कृष्णशुक्लौततोहस्तौपदमुद्भिद्यनिर्गतौ ॥ ६९ ॥ दृष्ट्वाहस्तद्वयंतत्रमुनिःसंशयमाग
तः ॥ ततःस्वमातरंशांतांभारद्वाजश्चपृष्टवान् ॥ ७० ॥ कश्यपस्यपदेदिव्येकृष्णेशु
क्लेऽथवाकरे ॥ पिंडोदेयोमयामातर्जानासिपितरंवद ॥ ७१ ॥ ॥ शांतोवाच ॥ ॥
॥ भारद्वाजमहाप्राज्ञदेहिकृष्णायपिंडकम् ॥ भारद्वाजस्ततःपिंडंदातुंकृष्णायचोद्यतः
॥ ७२ ॥ श्वेतोहस्योऽब्रवीत्तत्रपुत्रस्त्वंहिममौरसः ॥ कृष्णोऽब्रवीन्ममक्षेत्रंततोमेदेहि २०
पिंडकम् ॥ ७३ ॥ शुक्लोऽब्रवीत्स्वैरिणीयंपुत्रस्त्वंहिममौरसः ॥ स्वैरिण्यथाब्रवीद्वाक्यंक्षे

१ स्वर्गगामिनः कुर्यात्

त्रिणेवीर्यिणेततः ॥७४॥ भारद्वाजस्ततःपिंडंकश्यपस्यपदेपदौ ॥ हंसयुक्तविमानेनब्र
ह्मलोकमुभौगतौ ॥ ७५ ॥ रामोरुद्रपदेश्राद्धीपिंडदानायचोद्यतः ॥ पितादशरथःस्व
र्गेप्रसार्यकरमागतः ॥ ७६ ॥ नादात्पिंडंकरेरामोददौरुद्रपदेततः ॥ शास्त्रार्थातिक्र
माद्भीतोरामंदशरथोऽब्रवीत् ॥ ७७ ॥ तारितोहंत्वयापुत्ररुद्रलोकमवाप्नुयाम् ॥ ह
स्तेपिंडप्रदानेनस्वर्गतिर्नहिमेभवेत् ॥ ७८ ॥ त्वंचराज्यंचिरंकृत्वापालयित्वाद्विजा
न्प्रजाः ॥ यज्ञान्सदक्षिणान्कृत्वाविष्णुलोकंव्रजिष्यसि ॥ ७९ ॥ पुर्ययोध्याजनैः
सार्द्धपक्षिकीटादिभिःसह ॥ इत्युक्त्वासौदशरथोरुद्रलोकंपरंययौ ॥ ८० ॥ भीष्मोवि
ष्णुपदेदिव्येआजुहावस्वकान्पितॄन् ॥ श्राद्धंकृत्वोद्यतोदातुंपित्रादिभ्यश्चपिंडकम् ॥
॥ ८१ ॥ पितुर्विनिर्गतौहस्तौगयाशिरसिशंतनोः ॥ नादात्पिंडंकरेभीष्मोददौवि
ष्णुपदेततः ॥ ८२ ॥ शंतनुःप्राहसंतुष्टःशास्त्रार्थेनिश्चलोभव ॥ त्रिकालदृष्टिर्भवतु
अंतेविष्णुश्चतेगतिः ॥ ८३ ॥ स्वेच्छयामरणंचास्तुइत्युक्त्वामुक्तिमागतः ॥ कनके
शंचकेदारंनरसिंहंचवामनम् ॥ ८४ ॥ रथमार्गंसमभ्यर्च्यपितॄन्सर्वांश्चतारयेत् ॥
गयाशिरसियःपिंडान्येषांनाम्नातुनिर्वपेत् ॥ ८५ ॥ नरकस्थादिवंयांतिस्वर्गस्थामो
क्षमाप्नुयुः ॥ गयाशिरसियः पिंडंशमीपत्रप्रमाणतः ॥८६॥ कंदमुलफलाद्यैर्वादद्या
त्स्वर्गंनयेत्पितॄन् ॥ पदानियत्रदृश्यंतेविष्ण्वादीनांतदग्रतः ॥ ८७ ॥ श्राद्धंकृत्वा

तेषुपिंडांस्तेषांलोकंनयेत्पितॄन् ॥ सर्वत्रमुंडपृष्ठाद्रिःपादैरेभिः सुलक्षितः ॥ ८८ ॥
प्रयांतिपितरःसर्वेब्रह्मलोकमनामयम् ॥ पंचमेह्निगदालोलेस्नानंकृत्वासपिंडकम् ॥
॥ ८९ ॥ श्राद्धेपितॄन्ब्रह्मलोकंनयेदात्मानमेवच ॥ गदालोलमितिख्यातंसर्वेषामु
त्तमोत्तमम् ॥ ९० ॥ हेत्यासुरस्ययच्छीर्षंगदयाचद्विधाकृतम् ॥ यतःप्रक्षालितातीर्थे
र्थेगदालोलंततःस्मृतम् ॥ ९१ ॥ गदालोलेमहातीर्थेगदाप्रक्षालनेवरे ॥ स्नानंकरो
मिशुद्ध्यर्थमक्षय्यायस्वराप्तये[1] ॥ ९२ ॥ ब्रह्मप्रकल्पितान्[2]विप्रान्भोजयेत्तोषयेत्ततः ॥
तैस्तुष्टैस्तोषिताःसर्वाः पितृभिः सहदेवताः ॥ ९३ ॥ कृतेश्राद्धेऽक्षय्यवटेअन्नेनैवप्रय
त्नतः ॥ दृष्ट्वानत्वाचसंपूज्यवटेशंचसमाहितः ॥ ९४ ॥ पितॄन्नयेत्ब्रह्मलोकमक्षय्यंच
सनातनम् ॥ वटवृक्षसमीपेचशाकेनाप्युदकेनवा ॥ ९५ ॥ एकस्मिन्भोजितेविप्रेको
टिर्भवतिभोजिता ॥ गयायांधर्मपृष्ठेचशिरासिब्रह्मणस्तथा ॥९६॥ गयाशीर्षेवटेचैवपि
तॄणांदत्तमक्षयम् ॥ देयंदानंषोडशकंगयातीर्थेपुरोधसे ॥९७॥ वस्त्रगंधादिभिःसम्यक्
संपूज्यचप्रयत्नतः ॥ एकार्णवेवटस्याग्रेयः शेतेयोगनिद्रया ॥९८॥ बालरूपधरस्तस्मै
नमस्तेयोगशायिने । संसारवृक्षशस्त्रायाशेषपापहरायच ।९९। अक्षय्यब्रह्मदात्रेचनमो
ऽक्षय्यवटायवै ॥ कलौमाहेश्वरालोकायेनतस्माद्गदाधरः ॥ लिंगरूपंभवंतंचवंदेश्रीप्रपि

१ स्वर्गलोकप्राप्तये । २ गयाक्षेत्रस्थानित्यर्थः ।

तामहम् ॥१००॥ इतिवायुपुराणेश्वेतवाराहकल्पेगयामाहात्म्येसप्तमोध्यायः ॥७॥
॥ सनत्कुमारउवाच ॥ ॥ यज्ञंचक्रेगयोराजाबह्वन्नंबहुदक्षिणम् ॥ ॥ यत्रद्रव्यस
मूहानांसंख्यांकर्तुंनशक्यते ॥१॥ स्थितागयायामन्नानांपर्वताःपंचविंशतिः ॥ सिकता
वायथालोकेयथाचदिवितारकाः ॥ २ ॥ तथा बहुसुवर्णाद्यैरसंख्याताः सुदक्षिणाः॥
नैवेहकेचिदिहनकरिष्यंतितथापरे॥३॥ प्रविश्यंतिद्विजास्तृप्तादेशेदेशेसुपूजिताः ॥गयं
विष्ण्वादयस्तुष्टावरंब्रूहीतिचाब्रुवन्॥४॥ गयस्तान्प्रार्थयामासविप्राः शप्ताश्चयेपुरा ॥ ब्र
ह्मणातेद्विजाःपूताभवंतुक्रतुपूजिताः॥५॥ गयाश्राद्धविधानायद्विजामूर्ताश्चतुर्दश॥ तेषां
वाक्यंप्रकुर्वीतयदिब्रह्मास्वयंभवेत् ॥ ६ गौतमंकाश्यपंकौत्सकाशिकंकण्वमेवच ॥ भा
रद्वाजंह्यौशनसंवात्स्यंपाराशरंतथा ॥७॥ सनत्कुमारंमांडव्यंलौगाक्षिंलोमशंमहत्॥ वा
सिष्टंचतथात्रेयंगोत्राण्येषांचतुर्दश ॥८॥ गयापुरीतिमन्नाम्नाख्याताब्रह्मपुरंतथा ।एव
मस्तुवरंदत्वातथाचांतर्दधुस्सुराः॥९॥ गयश्चभोगान्संभुज्यविष्णुलोकंपरंययौ॥विशा
लायांविशालोभूद्राजपुत्रोब्रवीद्द्विजान् ॥१०॥ कथंपुत्रादयोमेस्युर्विशालंचाब्रुवन्द्विजाः
गयायांपिंडदानेनतवसर्वंभविष्यति ॥११॥ विशालोपिगयाशीर्षेपिंडदःपुत्रवानभूत् ॥
दृष्ट्वाकाशेसितंरक्तंकृष्णंपुरुषमब्रवीत् ॥१२॥ केयूयंतेषुचैवैकः सितः प्रोचेविशालकम्
॥ अहंसितस्तेजनकइंद्रलोकादिहागतः ॥१३॥ ममपुत्रपितारक्तोब्रह्महापापकृत्तमः ॥

अथपितामहः कृष्णऋषयोयेनघातिताः॥१४॥ अवाचिनरकंप्राप्तांमुक्तांत्वांत्पिंडदानतः
मुक्तिःकृतात्वयापुत्रव्रजामःस्वर्गमव्ययम्॥१५॥तातंपितामहंचैवतथैवप्रपितामहम्॥
प्रीणयामीतियत्तोयंत्वयादत्तमरिंदम।१६।तेनास्मद्युगपद्योगोजातोवाक्येनसत्तम।एवं
पुत्रैः पितृणांचकर्तव्यामुक्तिरुत्तमा॥१७॥त्वंचराज्यंचिरंकृत्वाभुक्त्वाभोगान्सुदुर्लभान्
यज्ञान्सदक्षिणान्कृत्वाअंतेविष्णुपुरंव्रज॥१८॥तत्रभोगैःसुतृप्तस्त्वमंतेमोक्षमवाप्स्य
सि॥एवंलब्धवरोराजाराज्यंभुक्त्वादिवंगतः।१९।प्रेतराजःसहप्रेतैर्गयाश्राद्धाद्दिवंगतः
॥प्रेतःकश्चित्स्वमुक्त्यर्थंवणिजंकंचिदब्रवीत्॥ २०॥ ममनाम्नागयाशीर्षेपिंडनिर्वपणं
कुरु॥ प्रेतभावविमुक्त्यर्थंत्वंगृहस्थंधनंमम॥२१॥तद्धनंसर्वमादायगयायज्ञेव्ययंकुरु॥
षोडशेपंचभागांश्चतुभ्यंवैदत्तवानहम्।२२।स्वनामानियथान्यायंसम्यगाख्यातवानर
हः॥गत्वावणिक्गयाशीर्षेप्रेतराजायपिंडकम्।२३।प्रददौमनुजः सार्धंस्वपितृभ्यस्ततो
ददौ ॥ प्रेताः प्रेतत्वनिर्मुक्ता वणिक्स्वगृहमागतः॥ २४ ॥ एवंगयस्यशंभोश्चक्षेत्रं
विष्णोःस्वयंभुवः ॥ उपोषितोथगायत्रीतीर्थेमहानदीस्थिते ॥ २५ ॥ गायत्र्यांपुरतः
स्नात्वाप्रातःसंध्यामुपासयेत् ॥ श्राद्धंसपिंडकंयेषांनयेद्ब्रह्मण्यतांकुलम् ॥ २६ ॥
तीर्थेसमुद्यतेस्नात्वासावित्र्याःपुरतोनरः॥ संध्यामुपास्यमध्यान्हेनयेत्कुलशतंदिवम्
॥ २७ ॥ पिंडदानंततःकुर्यात्पितृणांमुक्तिकाम्यया ॥ प्राचीसरस्वतीतीर्थेस्नात्वाचा

पियथाविधि ॥२८॥ संध्यामुपास्यसायाह्नेविष्णुलोंकंनयेत्पितॄन् ॥ बहुजन्मकृतात्सं
ध्यालोकान्मुक्तस्त्रिसंध्यकृत्॥२९॥विशालायांलेलिहानतीर्थेचभरताश्रमे॥पादांकिते
मुंडपृष्टेगदाधरसमीपतः॥३०॥तीर्थेचाकाशगंगायांगिरिकर्णमुखेषुच ॥स्नातोपिंडप्रदो
ब्रह्मलोकंकुलशतंनयेत्॥३१॥देवनद्यांवैतरिण्यांस्नातःस्वर्गंनयेत्पितॄन् ॥स्नातोगोदा
वरीतीरेत्रिःसप्तकुलमुद्धरेत्॥३२॥सत्यंसत्यंपुनःसत्यंवैतरण्यांतुनारद ॥एकविंशतिकु
लान्याशुतारयेन्नात्रसंशयः॥३३॥यमद्वारेमहाघोरेयासावैतरणीनदी॥तामहंतर्तुमिच्छा
मिकृष्णांगांप्रददन्निमाम्॥३४॥अशक्तोयदिवाशक्तोगांप्रदद्याद्द्विजातये॥यासावैतर
णीनामनदीत्रैलोक्यविश्रुता॥३५॥सावतीर्णामहाभागापितॄणांतारणायच॥त्रिरात्रोपो
षणेनैवतीर्थाभिगमनेनच॥३६॥अदत्त्वाकांचनंगाश्वदरिद्रोजायतेनरः॥घृतकुल्यामधु
कुल्यादेविकाचमहानदी ३७॥शिलायांसंगमोयत्रतीर्थंयत्रमधुश्रवः॥अयुतंचाश्वमेधा
नांस्नानकृल्लभतेनरः ३८॥श्राद्धंसपिंडकंकृत्वापिंडदानंतथैवच॥कुलानांशतमुद्धृत्यवि
ष्णुलोकंनयेत्पितॄन्॥३९॥दशाश्वमेधिकेहंसेतीर्थेचामरकंटके॥ कोटितीर्थेरुक्मकुंडेपिं
डदःस्वर्नयेत्पितॄन्॥४०॥वैतरण्यांघृतकुल्यांमधुकुल्यांतथैवच॥कोटितीर्थेनरःस्नात्वा
दृष्ट्वाकोटीश्वरंचयत् ॥४१॥ कोटिजन्मभवेद्विप्रोधनाढ्योवेदपारगः ॥ मार्कंडेयेशको
टीशोनत्वास्यात्पितृतारकः ॥४२॥ रुक्मपारिजातवनेपार्वत्यासहशंकरः ॥ रहस्य

संस्थितोरम्येवर्षाणामयुतंपुरा ॥ ४३ ॥ मरीचिःफलपुष्पार्थंपारिजातवनंगतः ॥ दृ
ष्ट्वाशप्तोमहेशेनयस्मात्सुखविघातकः ॥ ४४ ॥ दुःखीभवेतितद्भीत्यामरीचिस्तुष्टुवे
शिवम् ॥ तुष्टःप्रोवाचतंशंभुर्वृणीष्ववरमुत्तमम् ॥४५॥ शापाद्भवतुमुक्तिर्मेमरीचिःप्राह
शंकरम् ॥ भवेद्गयायांमुक्तिस्तेशिवोक्तःप्रययौगयाम् ॥४६॥ शिलास्थितस्तपस्तेपेस
वैषांदुष्करंचयत् ॥ मरीचिरीश्वराच्छप्तःकृष्णत्वमगमत्पुरा ॥ ४७ ॥ तपसादारुणेने
हसोपिशुक्लत्वमागतः ॥ हरिरूचेमरीचिंचवरंवृणुहिपुत्रक ॥ ४८ ॥ किंत्वन्धवयि
तुष्टेमेमरीचिराहमाधवम् ॥ हरशापाद्विमुक्तोहंशिलाभवतुपावनी ॥ ४९ ॥ पितृमुक्तिक
रीसाक्षात्तथेत्युक्त्वादिवंययौ ॥ दिवौकसांपुष्करिणींसमासाद्यनरःशुचिः ॥५०॥ य
त्रदत्तंपितृभ्यश्चभवत्यक्षय्यमित्युत ॥ तत्रस्नातोदिवंयातिस्वशरीरेणमानवः ॥६१॥
पाप्मानंप्रजहत्येषजीर्णांत्वचमिवोरगः॥ तत्रकुंजवरंपुण्यंपुण्यकृद्भिर्निषेवितम् ॥५२॥
पांडुशिलावैसाप्रेक्ताश्राद्धंतत्राक्षयंभवेत् ॥ युधिष्ठिरस्तुतस्यांहिश्राद्धंकर्तुंययौमुने ॥
॥५३॥ तत्रकालेपाडुंनोक्तंमद्धस्तेदेहिपिंडकम् ॥ हस्तंत्यक्त्वाशिलायांचपिंडदानंचका
रसः ॥५४॥ शिलायांपिंडदानेनप्रहृष्टोव्यासनंदनः ॥ वरंपुत्रायप्रददौराज्यंकुरुमही
तले ॥ ५५ ॥ अकंटकंतुसंपूर्णत्वंमेत्राताहिपुत्रक ॥ स्वर्गंव्रजशरीरेणपितृभिःपा २३
र्श्वगैःसह ॥ ५६ ॥ दृष्टिमात्रेणसंपूतान्नरकस्थान्दिवंनय ॥ इत्युक्त्वाप्रययौपांडुःशा

३वतंपदमव्ययम् ॥ ५७ ॥ मतंगस्यपदेश्राद्धीब्रह्मलोकंनयेत्पितॄन् ॥ निर्मथ्याग्निंश
मीगर्भेविधिविष्णवादिभिःसह ॥५८॥ लेभेतीर्थंतुयज्ञार्थंत्रिषुलोकेषुविश्रुतम् ॥ मख
संज्ञंचतत्तीर्थंपितॄणांमुक्तिदायकम् ॥ ५९ ॥ पितॄन्स्वर्गालयंनत्वासंगमेंगारकेश्वरौ ॥
गयाकूपेपिंडदानादश्वमेधफलंलभेत् ॥६०॥ भस्मकूटेभस्मनाथःस्नात्वातारयतेपितॄ
न् ॥ त्यक्त्वापापंभवेन्मुक्तःसंगमेस्नानमाचरेत् ॥ ६१ ॥ धौतपादोथनिः क्षीरासंग
मेस्नानकृन्नरः ॥ श्राद्धीरामपुष्करिण्यांब्रह्मलोकंनयेत्पितॄन् ॥६२॥ सुषुम्नांचमहाकु
ल्यात्रिःसप्तकुलमुद्धरेत् ॥ स्नातोनत्वावसिष्ठेशंतत्तीर्थेचाश्वमेधभाक् ॥ ६३ ॥ इष्टिं
चक्रेश्वमेधाख्यांवसिष्ठोमुनिसत्तमः ॥ इष्टितोनिर्गतःशंभुर्वरं[illegible]सिष्टक ॥ ६४ ॥
प्राहेतितंवसिष्टोपिशिवतुष्टोसिमेयदि ॥ त्रस्तव्यंचात्रदेशेचतथेत्युक्त्वाशिवःस्थितः॥
॥ ६५ ॥ पिंडदोधेनुकारण्येकामधेनुपदेषुच ॥ स्नात्वाश्राद्धयथसंपूज्यब्रह्मलोकं
नयेत्पितॄन् ॥ ६६ ॥ कर्द्दमालयेगयानाभौमुंडपृष्टसमीपतः ॥ स्नात्वा[illegible]
कृत्वापितॄणामनृणोभवेत् ॥ ६७ ॥ फल्गुचंडीश्मशानाक्षीमंगला[illegible]
गयायांचवृषोत्सर्गात्त्रिःसप्तकुलमुद्धरेत् ॥ ६८ ॥ यत्रतत्रास्थितादेव[illegible]
ह्रियाः ॥ गयागजोगयादित्योगायत्रीचगदाधरः ॥ ६९ ॥ गयागयशि[illegible]
मुक्तिदायकाः ॥ आदौगदाधरंध्यात्वाश्राद्धंपिंडादिकृन्नरः॥ ७० ॥ कु[illegible]

गया २४

त्यब्रह्मलोकंनयेत्पितॄम् ॥ गयाख्यानमिदंपुण्यंयःपठेत्सततंनरः ॥७१॥

यस्तुसयातिपरमांगतिम्॥श्रीमद्गयायामाहात्म्यंशृणुय[illegible]स्तु[illegible]क्तितः।

व्यासपुरुषंवित्तशाठ्यंनकारयेत्॥गोभूहिरणपदानानिवस्त्राल[illegible]णानि

व्यासपुरुषंभुक्तिमुक्तिप्रदायकम्॥पाठयेद्वागयाख्यानंविप्रेभ्यःपुण्यकृन्नर

श्राद्धंकृतंतेनकृतंतेनसुनिश्चितम्॥गयायामहिमानंचज्योतिष्टोमसभाहित

नेष्टंराजसुयेनअश्वमेधेननारद ॥ लिखेद्वालेखयेद्वापिपूजयेद्वापिपुस्तकम् ॥७६॥ [illegible]

गृहेस्थिरालक्ष्मीःसुप्रसन्नाभविष्यति ॥ उपाख्यानमिदंपुण[illegible]तिपुस्तकम् ७७॥

सर्पाग्निचोरजनितंभयंतत्रनविद्यते॥श्राद्धकालेपठेद्यस्तुगया[illegible]म्युत्तमम्॥७८॥

विधिहीनंतुसंपूर्णंपितॄणांतुगयासमम्॥यानितीर्थानित्रैलो[illegible]तिष्ठंतितत्रवै ७३॥

येनज्ञातंगयाख्यानंश्रुतंवापठितंमुने ॥ सोपितत्फलमाप्नोतिसम[illegible]नात्रसंशयः ॥८०॥

सूतउवाच॥सनत्कुमारोमुनिपुंगवायपुण्यांकथांचाथनिवेद्यभक्त्या ॥स्वमाश्रमंपुण्यव

नैरुपेतंविसृज्यसंगीतगुरुंजगाम ॥८१॥ इति श्रीवायुपुराणेश्वेतवाराहकल्पेगयामाहा

त्म्येअष्टमोऽध्यायः ॥ ८ ॥ समाप्तमिदंमाहात्म्यम् ॥

२४

यह पुस्तक छेदीलाल कुबेरलाल बुक्सेलर रमना गया ने बी. एल. पावगी द्वारा हितचिन्तक प्रेस रामघाट बनारस में छपाया

पुस्तक मिलनेका ठिकाना-छेदीलाल कुबेरलाल बुक्सेलर, रमना गयाजी ।